॥ श्रीः ॥

व्याकरणागमे प्रस्तावनाविशेषः ।

अथ लघुत्रिमुनिकल्पतरुः ।

प्रारभ्यते.



पूर्वो भागः ।

ॐ परमात्मने नमः ।

नत्वा शिवं गुरुं वाणीं वेङ्कटाचलसूरिणा ।
शेषादिना त्रिमुनिकल्पतरुः क्रियते लघुः ॥ १ ॥

अथ भगवान्परमकारुणिको लोकहितैषी यदृच्छया ब्रह्माणं सृष्ट्वा तस्मै त्रिवर्गस्य सर्वोत्तमस्य मोक्षस्य च, सम्पादकान् (ऋग्यजुस्सामाथर्वाख्यान्) साङ्गांश्चतुरो वेदानुपदिदेश । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्वेताश्वतरोपनिषच्छ्रुतेः । ब्रह्मापि तदुपदेशक्रमेणैव जगत्सृष्ट्वा वेदोक्तान्येव नामानि तत्तज्जात्यनुगुणानि निर्माय, अध्ययनादिरूपाणि च योग्यानि कर्माणि प्रजाभ्य उपदिदेश । तत्रेयं स्मृतिः—"सर्वेषां स तु नामानि कर्माणि च पृथक्पृथक् ॥ वेदशब्देभ्य एवासौ पृथक्संस्थाश्च निर्ममे " इति । तत्र यजुर्वेदः शुक्लकृष्णभेदेन द्विविधः । दर्शपूर्णमासादिसर्वयाज्ञिकमन्त्राणां ब्राह्मणासंमिश्रतया यथोक्तक्रमविन्यासेन शुक्लत्वमेकस्य अन्यस्य तु ब्राह्मणासङ्कीर्णत्वाद्याज्ञिकमन्त्राणां क्रमपाठाभावाच्च क्रमस्य दुर्ज्ञेयतया कृष्णत्वमिति वदन्ति । कृष्णयजुर्वेदेष्वेकस्याः तैत्तिरीयशाखेति नामान्तरमपि । सर्वत्र वेदेषु संहिता ब्राह्मणमारण्यकमुपनिषदश्चेत्याद्यवान्तरभेदा बहवो दृश्यन्ते । मन्त्रभाग एकः, ब्राह्मणभाग अन्यः सर्वोपीत्यभिप्रायेण मन्त्रब्राह्मणयोर्वेदनामधेयमित्यस्योपपत्तिः । तत्र सर्वेष्वपि वेदेषु कर्मज्ञानकाण्डभेदेन भागद्वयम् । कर्मप्रतिपादको भागः कर्मकाण्डशब्देनोच्यते, ज्ञेयार्थप्रतिपादको भागो ज्ञानकाण्डशब्देन । ज्ञानकाण्डशब्देनोपनिषद उच्यन्ते । कर्मकाण्डशब्देन तद्भिन्ना वेदभागा उच्यन्ते । कर्मशब्देनाष्टाचत्वारिंशत्संस्कारा आग्नेयाद्यक्ता उच्यन्ते । ते च—

अष्टाचत्वारिंशत्संस्कारा नाममात्रेण निर्दिश्यन्ते—

(१) गर्भाधानम् (२) पुँसवनम् (३) सीमन्तः (४) विष्णुबलिः (५) जातकर्म (६) नामकरणम् (७) उपनिष्क्रामणम् (८) अन्नप्राशनम् (९) कर्णवेधः (१०) चौलम् (११) अक्षरस्वीकरणम् (१२) उपनयनम् (१३) व्रतम् (१४) समावर्तनम् (१५) विवाहः (१६) उपाकर्म (१७) उत्सर्जनम् ॥

अथ सप्त पाकयज्ञाः—

(१८) हुतम् (१९) प्रहुतम् (२०) आहुतम् (२१) शूलगवः (२२) बलिहरणम् (२३) प्रत्यवरोहणम् (२४) अष्टकाहोमः ॥

इति सप्त पाकयज्ञाः ॥

अथ सप्त हविर्यज्ञसंस्थाः—

(२५) अग्न्याधानम् (२६) अग्निहोत्रम् (२७) दर्शपूर्णमासौ (२८) चातुर्मास्यानि (२९) आग्रयणेष्टिः (३०) निरूढपशुबन्धः (३१) सौत्रामणी ॥

इति सप्त हविर्यज्ञसंस्थाः ॥

अथ सप्त सोमयज्ञसंस्थाः—

(३२) अग्निष्टोमः (३३) अत्यग्निष्टोमः (३४) उक्थ्यः (३५) षोडशी (३६) वाजपेयः (३७) अतिरात्रः (३८) आप्तोर्यामः ॥

इति सप्त सोमयज्ञसंस्थाः ॥

(३९) वानप्रस्थ्यम् (४०) संन्यासः ॥

अथ सप्ताऽऽत्मगुणाः—

(४१) दया (४२) अनसूया (४३) शौचम् (४४) अनायासः (४५) अङ्गल्यम् (४६) अकार्पण्यम् (४७) अस्पृहा (४८) अन्त्येष्टिः । तत्र पाकयज्ञेषूक्तानां केषांचिदन्तर्भावाङ्गीकारेण न्यूनतायामिष्टापत्तिरेवेति दिक् ।

अथोत्तरक्रतवः—

(१) राजसूयः (२) गवामयनम् (३) गोसवः (४) अश्वमेधः (५) आङ्गिरसक्रतुः (६) साकमेधः (७) पञ्चशारदीयः (८) विश्वजित् (९) पौण्डरीकम् (१०) मर्तृद्वादशाहम् (११) संवत्सरसत्रम् (१२) महाव्रतम् (१३) रात्रिसत्रम् (१४) शतरात्रम् (१५) स्तोमः (१६) द्वादशसंवत्सरक्रतुः (१७) सहस्रसंवत्सरक्रतुः । एवमन्येपि बोध्याः ॥

वेदभेदेन— सूत्रकर्तारः—

१ ऋग्वेदस्य
- १ साङ्ख्यायनः
- २ शाकलः
- ३ बाष्कलः
- ४ आश्वलायनः
- ५ माण्डूकः

२ यजुर्वेदस्य
- ६ आपस्तम्बः
- ७ हिरण्यकेशीयः
- ८ मैत्रायणीयः
- ९ सत्याषाढः
- १० बोधायनः

} षट् सूत्रकारा इत्यन्ये ।

३ सामवेदस्य { ११ कौथुमः, १२ राणायनः, १३ गौमिलः, १४ राणायनीयः } दश सूत्रकारा इत्यन्ये ।

४ अथर्वणवेदस्य { १५ पिप्पलादः, १६ शौनकः }

एतावत्यश्शाखा उपलभ्यन्ते इति केचित् ।

तत्रैतानि कर्माणि लोकैर्मुमुक्षुभिः सत्त्वशुद्ध्यर्थतया मुक्तैश्च लोकसंग्रहार्थतया कर्तव्यानि भवन्ति । तेषां वेदानां शाखाः बहुधा भवन्ति । तत्र ऋग्वेदस्यैकविंशतिशाखाः, शुक्लयजुर्वेदस्य पञ्चदशभिः शाखाभिः मिलित्वा यजुर्वेदस्य महाभाष्यरीत्यैकशतशाखाः, सीतोपनिषद्रीत्या तु नवोत्तरशतशाखाः, सामवेदस्य सहस्रशाखाः, अथर्वणस्य नव शाखा इति ज्ञेयम् । तत्रर्ग्वेदे इदानीं पठ्यमाना बाष्कलशाखेति केचिद्वदन्ति । शाकलशाखेति बहवः । तत्र न प्रमाणमुपलभ्यते लोकव्यवहारमन्तराऽन्यदिति केचित् । अथर्वणवेदे भागद्वयमस्ति—मैषज्यभागः, मन्त्रभागश्चेति । आद्यः अथर्वणेनान्यो घोरापरनाम्नाऽऽङ्गिरसेन दृष्टः । ततः मिलित्वाऽथर्वाङ्गिरस इति नामेति केचित् । कालवशेन सर्वा लुप्ताः सत्यो काश्चिदेव पञ्चषाः शाखा अवशिष्यन्ते । लुप्ताश्च नामतोपि दुर्ज्ञेयाः प्रायस्संवृत्ताः । अथर्वणवेदस्य शाखान्तरं काश्मीरतो लब्धं भूर्जपत्रलिखितममरिकायां प्रतिचित्रितमिति शृणुमः ।

एषां परिज्ञायमानशाखानां श्रीमाधवाचार्यैः विजयनगरसंस्कृतपुस्तकालय्यां (विजयनगरं संस्कृतसीरीस्—नामकमुद्रितविवरणप्रमेयसंग्रहे) भूमिकोक्तरीत्या १३१२ शके अथवा १३९२ तमस्थिस्तशके उत्पन्नैर्देवगिरौ राज्यकर्तुः जैत्रपालस्य कृष्णराजानुजस्य स्वयं ११८२ तमे शके राज्यासनमधिरूढस्य रामचन्द्रदेवप्रतिभुवो राज्ञः सर्वाधिपत्यपदे नियुक्तो यः प्रसिद्धो हेमाद्रिः चतुर्वर्गचिन्तामणिग्रन्थकर्ता तस्योत्तरकालिकैः भाष्याणि रचितानीदानीमपि जाग्रति । तथोवटभाष्यमपि जागर्त्ति अन्यान्यप्येतदपेक्षया प्राचीनकालेषु—स्कन्दस्वामि, भवस्वामि, राहदेव, श्रीनिवास, माधवदेव, इत्यादिभिः कृतानि वेदभाष्याण्यासन् । अहोबलभाष्यमप्यासीदिति चमकव्याख्यायां सायनाचार्यभाष्यादनुमीयते । भट्टभास्करभाष्यं नाम कृष्णयजुर्वेदसंहिताभाष्यमपि मैसूरराज्ये राजकीयमुद्रणालये मुद्रितमुपलभ्यते । तत्रैतत्संहितायाः चतुर्थकाण्डभाष्यमनुपलब्धेर्न मुद्रितम् ।

विक्रमार्कसमयादतीतेषु ८४९ मितवर्षेषु केरलदेशे कलापीग्रामे शिवगुरुशर्मणः पुत्रत्वेन कलेरादितः ३८८९ तमे विभवसंवत्सरे वैशाखमासे शुक्लपक्षे दशम्यामवतीर्णैः श्रीमच्छङ्करभगवत्पादैश्च दशोपनिषदोन्याश्च काश्चित्तथा श्रीमद्विद्यारण्यैश्च बहवो व्याख्याताः । एतद्विभागकर्त्तारो व्यासा बहवः, बहव ऋषयश्चेति तु प्रकृतानुपयोगाद्ग्रन्थबाहुल्याच्च नोक्ताः । तथा तत्प्रकारोपि । न चास्मदीयवेदवदन्यान्यग्रन्थराशेरपि वेदशब्देन व्यवहारोऽस्तीति तद्भङ्ग-

त्वमप्येषां स्यादिति **वाच्यम्** । सकलभाषामूलभूतसंस्कृतभाषाया आदिभाषात्वेन तादृश-भाषाव्युत्पादकस्य स्वेतरभाषादिवेदाङ्गत्वे मानाभावात् । **किञ्चात्र** वेदशब्दस्य योगरूढत्वं, तत्र तु केवलयौगिकत्वमिति विशेषात् । **अपि चैतदुत्पत्तिसमयेऽनादेरपौरुषेयस्यार्थतो नित्य-स्यास्य सिद्धत्वात् । मूलवेदवत्तदङ्गस्यापि नव्यत्वेन कल्पनीयत्वाच्च** ।

वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः । भोजने प्रयोजने श्येनयागादौ च दोषवारणाय पदत्रयमत्र लक्षणे बोध्यम् । ईश्वरेण वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा इति **वेदः** । अपौरुषेयं वाक्यं वेद इति यावत् । यद्वेष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । **अलौकिकपदेन** प्रत्यक्षानुमाने व्यावर्त्येते । अनुभूयमानस्रक्चन्दनवनितादेरिष्टप्राप्ति-हेतुत्वमौषधसेवनादेरनिष्टपरिहारहेतुत्वं च **प्रत्यक्षसिद्धम्** । स्वेनानुभूयमानस्य पुरुषान्तरगत-स्य च तथात्वमनुमानगम्यम् । **नन्वेवं** भाविजन्मगतसुखादिकमप्यनुमानगम्यमिति **चेन्न** । तद्विशेषस्यानवगमात् । न हि कोपि ज्योतिष्टोमादिष्टप्राप्तिः कलञ्जभक्षणवर्जनादनिष्टनिवृत्ति-रित्यमुमर्थं वेदमन्तरेणानुमानसहस्रेणाप्यवगन्तुं शक्नोति । तस्मादुक्तलक्षणो वेद इति न स वेद इति सिद्धम् । "प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुद्ध्यते । एवं वदन्ति वेदेन तस्मा-द्वेदस्य वेदता" इत्यन्यत्र विस्तरः ।

ऋग्यजुश्च **'मन्त्रः'** इत्युच्यते । मन्त्रा द्विविधाः—वैदिकाः, तान्त्रिकाश्चेति । वैदिकाश्च द्विविधाः—प्रगीताः, अप्रगीताश्चेति । तत्र प्रगीताः सामानि । अप्रगीता द्विविधाः—छन्दो-बद्धास्तद्विलक्षणाश्चेति । तत्र प्रथमा ऋचः । अन्त्या यजूंषि । नियतवर्णपदा ऋक् । ऋग्वा-ह्यत्ववानृग्वेद इति यावत् । अनियतवर्णपदं यजुः । निगदो यजुर्विशेषः । ऋग्यजुषोर-विवक्षया गानप्राधान्यवान् सामवेदः । ऋग्यजुषोरविवक्षया शान्तिकपौष्टिकप्राधान्यवानथ-र्वणवेद इति विवेकः ।

विधिरर्थवादोनुवादश्च **ब्राह्मणम्** । तच्च "ब्राह्मणम्--अष्टविधम्--ऐतिहासः--पुराणम्--विद्या--उपनिषद्--श्लोकाः--सूत्राणि--व्याख्यानानि--अनुव्याख्यानानि" इति श्रीत्रि-यारण्यैः तैत्तिरीयोपनिषद्दीकायां दीपिकायामुक्तम् । तत्र विधिर्नाम--अज्ञातार्थबोधकं वाक्यम् । सविधिश्चतुर्धा--उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । कर्मस्वरूपमात्रबोधको विधिः—**उत्पत्तिविधिः** । अङ्गप्रधानबोधको विधिः—**विनियोगविधिः** । कर्मजन्यफलस्वाम्यको विधिः—**अधिकारविधिः** । प्रयोगप्रांशुभावबोधको विधिः, अङ्गानां प्रयोगबोधको विधिर्वा—**प्रयोगविधिः** ।

पुनस्त्रिविधो विधिः—अपूर्वविधिर्नियमविधिः परिसङ्ख्याविधिश्चेति । प्रमाणान्तरेणाप्रा-प्तस्य प्रापको विधिः—**अपूर्वविधिः** । पक्षप्राप्तानुवादको विधिः—**नियमविधिः** । इतरव्यावृत्तिफ-लको विधिः—**परिसङ्ख्याविधिः** । अयं परिसङ्ख्याविधिः द्विधा—श्रौती, लाक्षणिकी चेति ।

अर्थवादः—प्राशस्त्यनिन्दान्यतरपरं वाक्यम् । स द्विविधः—**विधिशेषः, निषेधशेषश्चेति** । स त्रिधा—गुणवादानुवादभूतार्थवादभेदात् । प्रमाणान्तरविरोधे सत्यर्थवादः—**गुणवादः** ।

प्रमाणान्तरावगतार्थबोधकवादः—अनुवादः । प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको वादः—भूतार्थवादः ।

विधिमन्त्रनामधेयनिषेधार्थवादादिमीमांसापूर्वं वेदार्थनिर्णयः कार्यः । विधीनामनुष्ठानविधायकत्वेन, मन्त्राणामनुष्ठेयार्थस्मारकत्वेन, उद्भिदादिशाक्यानां नाम्ना विधेयार्थपरिच्छेदकत्वेन, निषेधानां विधेयार्थसंकोचकत्वेन, अर्थवादानां विधेयप्राशस्त्यसंपादकत्वेन—अर्थवत्त्वमिति दिक् ।

उपवेदाश्च चतुर्धा—क्रमेणाऽऽयुर्वेदधनुर्वेदगान्धर्ववेदतन्त्रभेदात् ।

अस्याः वेदराशेः षडङ्गानि, शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं कल्पश्चेति । "छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्" इति शिक्षावचनात् । अत एव व्याकरणं मुख्यमङ्गम् । सर्वस्य गात्रस्य शिरः प्रधानमित्यभियुक्तोक्तेः । मुखस्यैव प्रायः पुरुषभेदादिपरिचायकत्वदर्शनाच्च ।

तत्र—शिक्षा नाम—उदात्तानुदात्तस्वरितप्रचयाख्यस्वरह्रस्वदीर्घप्लुतानुनासिकाननुनासिकादिभेदभिन्नवर्णसमुदायात्मकपदपरिपाटीक्रमेण वेदशिक्षणप्रकारवान् नारदपाणिन्यादिमहर्षिकृतो ग्रन्थः । "अथ शिक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम सन्तानः" इति श्रुतेः । किं च "गीती शीघ्री शिरःकम्पी तथाऽलिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ १२ ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ १३ ॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" ॥ १२ ॥ "आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया" ॥ १ ॥ इत्याद्युक्तरीत्योच्चारणादेस्तदेकगम्यत्वात् । उच्चारणमर्थज्ञानपूर्वकमेवावश्यकमिति दिक् । तत्र निर्दुष्टतया शब्दोच्चारणे दोषज्ञानमन्तरा निर्दुष्टत्वज्ञानासंभव इति तादृशसंवृताद्यष्टादशदोषज्ञानं शिक्षाधीनमिति ज्ञेयम् । ते दोषाश्च—(१) संवृतः—एकारादीनां संवृतत्वं दोषो, न त्वकारस्य । (२) कलः—स्थानान्तरनिष्पन्नः । (३) ध्मातः—येन श्वासाधिक्याद्ह्रस्वोपि दीर्घ इव लक्ष्यते । (४) एणीकृतः—अविशिष्टः किमयमोकारोऽथवौकार इति सन्देहो यत्र । (५) अम्बूकृतः—योव्यक्तोप्यन्तर्मुखो दृश्यते । (६) अर्द्धकः—दीर्घोपि ह्रस्व इव । (७) ग्रस्तः—जिह्वामूले निगृहीतः । (८) निरस्तः—निष्ठुरः । (९) प्रगीतः—सामवदुच्चारितः । (१०) उपगीतः—समीपस्थवर्णान्तरगीत्याऽनुरक्तः । (११) क्षिप्तः—कम्पमान इव । (१२) रोमशः—गम्भीरः । (१३) अविलम्बितः—वर्णान्तरासम्भिन्नः । (१४) निहतः—रूक्षः । (१५) विकम्पितः—स्पष्टोऽर्थः । (१६) सन्दष्टः—वर्द्धित इव । (१७) द्रुतम्—स्पष्टोऽर्थः । (१८) विकीर्णः—वर्णान्तरप्रसृतः—एकोऽप्यनेकनिभः इति । ताश्च शिक्षाः द्वात्रिंशत्संख्याका मुद्रिताः शिक्षासंग्रहनाम्ना ।

छन्दो—नाम—लौकिकवैदिकशब्दान् छन्दयति नियमयतीति पादयतिविरामादिव्यवस्थापकः पिङ्गलादिमहर्षिप्रणीतो ग्रन्थः । गायत्र्या यजतीत्यादिविध्यादौ निर्णयायोपयुज्यते । तत्रेदाश्च प्रस्तारादिना नानेत्यादिकं तत एवावधार्यम् ।

ज्योतिषं नाम—लोकवदेव सूर्यचन्द्रादिज्योतिराश्रित्य तत्तद्वेदशास्त्रविहितकर्मानुष्ठानकाल-निर्णयायाध्ययनाध्यापनादिविधिनिषेधकालनिर्णयाय गरुडचयनादौ गणितज्ञानायाऽऽपद्यादिषु होराप्रश्नस्कन्धद्वारा फलादेशादिप्रतिपादनाय कृतो ग्रन्थः । परं तु ऋग्वेदाङ्गज्योतिषं षट्त्रिंशद्ग्रन्थात्मकमिति विशेषः । वेदाङ्गज्योतिषग्रन्थस्य टीका सोमाकरकृतास्ति । तत्र टीकान्यभागे " शेषकृतयजुर्वेदाङ्गज्योतिष " इत्युल्लेखाद्वेदभेदेन तदङ्गज्योतिषमपि भिन्नमिति ज्ञायते । तत्र यजुर्वेदाङ्गज्योतिषमृग्वेदाङ्गज्योतिषापेक्षयाऽभिन्नमेव । प्रायः । तत्रर्ग्वेदाङ्गज्योतिषस्था एव त्रिंशद्ग्रन्था यजुर्वेदाङ्गज्योतिषे क्वचिद्वृत्तमात्रेण भिन्नाः । अर्थेन त्वभिन्ना एव दृश्यन्ते । तथा त्रयोदश ग्रन्थास्ततोधिका दृश्यन्ते । ऋग्यजुर्वेदाङ्गज्योतिषयोस्संहत्य ग्रन्था एकोनपञ्चाशत्तुः । अथर्वणवेदाङ्गज्योतिषं त्वेतदुभयापेक्षया विलक्षणमेव । वेदाङ्गज्योतिषाचार्यश्च " लगधः " इति " पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् । दिनर्क्षायनमासाङ्गं प्रणम्य शिरसा शुचिः ॥ १ ॥ प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् । कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥ इति तदादावुक्तेः । मलयाळदेशे " लगडाचार्यः " इत्यपि देशभेदेनोच्चारणभेदो दृश्यते ।

कल्पो नाम—बोधायनापस्तम्बाश्वलायनादिमहर्षिप्रणीत एकशाखायां भिन्नभिन्नप्रकरणोक्त-मन्त्राणां न्यायलभ्यशाखान्तरस्थानां च मन्त्राणां प्रयोगक्रमकल्पको ग्रन्थः । ते च बहवः । तथापि कानिचित्प्रदर्श्यन्ते नामभिः—

तत्र पूर्वसूत्राणि नव—	अपरसूत्राणि नव—
१ अग्निवेश्यसूत्रम् ।	१ वैखानससू०
२ बोधायनसूत्रम् ।	२ शौनकीयसू०
३ आपस्तम्बसूत्रम् ।	३ भारद्वाजसू०
४ सत्याषाढसूत्रम् ।	४ अग्निवेश्यसू०
५ द्राह्यायणसूत्रम् ।	५ जैमिनीयसू०
६ अगस्त्यसूत्रम् ।	६ अमायुन्यसू०
७ शाकल्याश्वलायनसूत्रम् ।	७ माध्यन्दिनसू०
८ शाम्भवीयसूत्रम् ।	८ कौण्डिन्यसू०
९ कात्यायनीयसूत्रम् ।	९ कौशीतकिसू०

इत्यष्टादश सूत्राणि स्मृतिमुक्ताफले आचारकाण्डे स्मृतिकर्तृनिरूपणप्रकरणे वैद्यनाथदीक्षितैर्यथोक्तानि तथात्र प्रदर्शितानि । एतेषां श्रौतस्मार्तधर्मादिभेदेन बहवोऽवान्तरभेदाः ।

व्याकरणं नाम—अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययादिविशेषादीन्विदधत्पदखण्डार्थविशेष-ज्ञापकः विशेषेण संस्कारविशेषेण आसमन्ताद्वैदिकाँल्लौकिकांश्च शब्दान्करोति तथाभूत

पाणिन्यादिमहर्षिप्रणीता ग्रंथराशिः । तच्च नवविधम् "—ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् । सारस्वतं चापिशलं शाकलं पाणिनायकम्" इति श्रीतत्त्वनिधावुक्तेः "सोयं नवव्याकरणार्थवेत्ता" इति श्रीवाल्मीकीयरामायणे उक्तेश्च । न चेदमप्रमाणम् । हनुमतस्समये पाणिन्यादेरनुत्पत्तेरिति वाच्यम् । अत एव पूर्वपूर्वयुगीयपाणिनीयव्याकरणादीनां सत्त्वानुमानात् । "धातवः यथापूर्वमकल्पयद्" इति श्रुतेः ।

(१) **तत्र-ऐन्द्रं व्याकरणं** श्रुत्योद्घुष्यते—"वाग्वै पराच्यव्याकृता अवदत् ॥ तं देवा इन्द्रमब्रुवन् । इमं नो वाचं व्याकुर्विति । सोऽब्रवीत् । वरं वृणै । मह्यं चैवैष वायवे च सह गृह्नाताविति । तस्मादैन्द्रवायवस्सह गृह्यते । तामिन्द्रो मध्यतोपक्रम्य व्यापकरोत् । तस्मादियं व्याकृता वागुच्यते", इति । इयं श्रुतिरिन्द्रस्य व्याकरणकर्तृत्वपरत्वेन श्रीविद्यारण्याचार्यैर्व्याख्याता ।

(२) **चान्द्र**मार्षग्रन्थेष्वन्वेषणीयम् । "चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः" इत्यादिना स्पष्टमनुमातुं शक्यते तत्सत्ता ।

(३) **काशकृत्स्नं व्याकरणं** पतञ्जलिना "शेतौच्चै ठन्यता—" इत्यत्र नाम्ना उक्तम् ।

(४) **कौमारं** त्वाग्नेयपुराणेन्त्यभागे । एतत्पाणिनिकृतं प्रातिशाख्यसूत्रमेव तदित्यन्ये ।

(५–६) **सारस्वतं, शाकटायनमृक्तन्त्रव्याकरणाख्यं** चाधुना मुद्रितान्युपलभ्यन्त एव सर्वत्र भरतखण्डादौ ।

(७-८) **आपिशलं, शाकलं** च; पाणिनिसूत्रेषु तत्रतत्र तन्नाम्नोरनुवादात्ते बभूवतुरित्यनुमीयेते ।

(९) **पाणिनीयं व्याकरणं** चाधुना मुद्रितं सर्वत्रोपलभ्यत एव ।

एवम् "अवङ् स्फोटायनस्य" इत्युक्तेः स्फोटायनव्याकरणं, कात्यायनेन "पौष्करसादेः" इत्युक्तेः पौष्करसादिव्याकरणं, "विन्दतिश्चान्द्रदौर्गादेः" इत्युक्तेर्दौर्गव्याकरणम्, "व्याघ्रभूत्यादयस्त्वेनम्" इत्याद्युक्तेर्व्याघ्रभूतिव्याकरणादिकमप्यासीदित्यनुमीयते । श्रीमत्पण्डितम्याक्सिमल्कृतं, भोजकृतं, व्याकरणं श्रीमण्डारकरकृतमार्गोपदेशिकादिव्याकरणं च सुलभमेव । एवमाशुबोधव्याकरणं जैनेन्द्रव्याकरणं कातन्त्रव्याकरणं च ।

नन्वेवं सत्स्वेतेषु बहुषु व्याकरणेष्वन्यतमस्य यस्य कस्य वा वेदाङ्गत्वमास्तामिति चेन्न । इच्छया नियममन्तरा कस्याप्यर्थनिर्णयस्यायुक्तत्वात् । एकस्यैव शब्दस्य व्याकरणभेदेन साधुत्वासाधुत्वयोरापत्तेश्च । तस्मात्सर्वलौकिकालौकिकशब्दव्युत्पादकस्य पाणिनीयव्याकरणस्यैव वेदाङ्गत्वाभ्युपगमस्स्यात् । व्याकरणान्तरे तु सर्वेषां लौकिकालौकिकशब्दानां न व्युत्पादनम् । "इदमक्षरं छन्दो वर्णशस्समनुक्रान्तं ब्रह्मावृहस्पतये प्रोवाच । वृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः । तं खल्विममक्षरसमाम्नायमित्याचक्षते न भुक्त्वा न नक्तं ब्रूयाद्ब्रह्मराशिः" इति ऋक्तन्त्रव्याकरणोक्तरीत्याक्षररूपस्यास्य चतुर्दशसूत्रकदम्बस्याम्नायत्वमिति तन्मूलकत्वाच्च । अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यमित्युक्तम् । छान्दो-

ग्येऽपि व्याकरणं (चतुर्दशसूत्ररूपम्) उपक्रम्य वेदानां वेद इत्युक्तम् । किं च " कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः । द्वापरे शङ्खलिखिताः कलौ पाराशरास्स्मृताः" इति वचनेनाऽऽचारव्यवस्थावच्छब्दसाधुत्वासाधुत्वव्यवस्थाया अपि पाणिनिकृताया एवाभ्युपेयत्वात् । अत एव पराशरोपपुराणे—"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् । सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किंचन" इत्युक्तं संगच्छते । अत एव "शताच्च ठन्यतावशते" इति सूत्रे शाकलकाशकृत्स्नव्याकरणान्तरस्थं " शताच्च ठन्यतावग्रंथे "इति सूत्रमुपन्यस्य तन्मते शत्यश्शतिको वा गोसंघ इति साधुः । पाणिनिमते तु शतको गोसंघ इत्येव साधुरिति व्याकरणयोर्विरोधमुपन्यस्य नियतकालाश्च स्मृतयो व्यवस्थाहेतवो भवन्ति । "कलौ पाराशरास्स्मृताः" इतिवन्मुनित्रयमतेनैवाऽद्यत्वे साध्वसाधुप्रविभाग इत्युक्तं भाष्यकैयटयोः । यथोत्तरम् मुनीनां प्रामाण्याच्च । अत एव "न बहुव्रीहौ" इत्यत्र महाभाष्ये त्वत्कृत्पितृक इत्यस्यैव साधुत्वं, न त्वत्कृत्पितृक इत्यस्येति स्पष्टम् । एतद्व्याकरणमूलभूतचतुर्दश सूत्राणि भगवता परमकारुणिकेन महेश्वरेण पाणिनये उपदिष्टानि । अत एव " नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् (१४) । उद्धर्तुकामस्सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् " इति नंदिकेश्वरकृतकाशिकायामुक्तं, " येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तम् " इत्युक्तं च संगच्छत इति दिक् । ननु पदपदार्थनिर्णायकत्वेन व्याकरणस्योक्तं वेदाङ्गत्वम् । तत्र व्याकरणस्थपदपदार्थनिर्णायकं किमिति चेत्तत्रान्यत्तत्रान्यदित्यनवस्थेति चेन्न । वेदार्थनिर्णायकं मुख्यमङ्गमिदमेव । व्याकरणे तन्निर्णायकं तु काव्यकोशादिकम् । तत्र चोपदेशपरम्परेत्यदोषादिति दिक् ।

निरुक्तं नाम—व्याकरस्यैव परिशिष्टमिति वक्तुं युक्तम् । वैदिकाश्शब्दा निश्शेषेणोच्यन्तेऽर्थादिनिर्णयेनेति तथाभूतः यास्कप्रणीतो ग्रन्थः । स चाष्टादशाध्यायात्मकः । तत्रान्तिमौ द्वावध्यायौ परिशिष्टशब्देनोच्येते । चतुर्दशाध्यायानां खण्डानि (४८०) एकेषां मते । अन्यमते (४४८), ततः परस्य मते (४४३) इति ज्ञेयानि । नैघण्टुककाण्डस्य पञ्चाध्यायाः, नैगमकाण्डस्य षडध्यायाः, दैवतकाण्डस्य षडध्यायाः, परिशिष्टस्यैकोध्यायः इत्यष्टादशाध्याया अत्र ज्ञेयाः । उदाहरणरूपं वेदवाक्यं निगमः । एतद्भाष्यं स्कन्दस्वामिना कृतम् । नैघण्टुककाण्डे षष्ठाध्यायादि जम्बूमार्गाश्रमवासिदुर्गाचार्यकृतमृग्व्यर्थाख्यव्याख्यानं मुद्रितमेव । अत्रिगोत्रदेवराजयज्वकृतनैघण्टुककाण्डस्य निर्वचनाख्यव्याख्यानमादौ पञ्चमाध्यायान्तमस्ति । क्षीरस्वाम्यनन्ताचार्येण निघण्टुव्याख्या कृतेत्युल्लेखः क्वचिद्दृश्यते । निघण्टुपदेनायमन्यो वा लौकिक इति विचार्यम् । प्राय इदमेव भवेत् । यतोस्य नाम बहवो ग्रन्थकारास्स्वग्रन्थेषूद्दङ्कयन्ति ।

तस्यास्य व्याकरणस्य को विषयः, किं प्रयोजनम्, अधिकारी कः, सम्बन्धश्च कः इति चेत्तत्राहुः—वैदिका लौकिकाश्च शब्दाः विषयाः । तज्ज्ञानं प्रयोजनम् । तज्जिज्ञासुरधीतकाव्यकोशादिरधिकारीति ज्ञेयम् । तान्यष्टादशप्रकाराणि— १ वेदरक्षा, २ ऊहः, ३ आगमः, ४ लघ्वम्, ५ असन्देहः, ६ म्लेच्छताऽसम्पत्तिः, ७ स्वरवर्णदोषराहित्यम्, ८ सार्थकवेदज्ञानम्, ९ सुशब्दापशब्दज्ञानयोर्धर्माधर्मज्ञानम्, १० प्रत्यभिवादे नाम्नि प्लुतज्ञानम्, ११

विध्यादिवाक्यघटकविभक्तिपदार्थादिज्ञानम्, १२ पदाक्षरादिविभागज्ञानम्, १३ चतुर्विधपदजातकालव्यङ्ग्यव्यञ्जकविभक्तिस्थानभेदज्ञानम्, **यद्वा** सकलपदजातज्ञानम्, १४ वाग्विस्तारसम्पत्तिः, १५ असाधुशब्देभ्यो विविच्य सुशब्दज्ञानम्, १६ अपशब्दप्रयोगजन्यप्रत्यवायपरिहारकप्रायश्चित्ताभावः, १७ नामकरणेषु विहितनामस्वरूपज्ञानम्, १८ सर्वविभक्त्यन्तानां सम्यगुच्चारणमिति । एतद्व्याख्यानं महाभाष्ये विस्तृतम् । तथापि किञ्चिन्निरूप्यते । तद्यथा—(१) भद्रं कर्णेभिरित्यादौ लोकविलक्षणस्थ कर्णेभिरित्यस्य " बहुलं छन्दसि " इति व्याकरणेन साधुत्वम् । (२) अग्नये त्वा जुष्टं निर्वपामीत्यादौ सूर्योद्देश्यताकत्वविवक्षायां सूर्याय त्वा जुष्टं निर्वपामीत्याद्यूहो व्याकरणेन सिध्यति (३) विश्वेदेवासः इत्यादौ " आज्जसेरसुक् " इत्यसुगागम इत्यादिकं व्याकरणेन सिध्यति । (४) ब्राह्मणस्याध्यापनं धर्मः । तच्चाध्यापनं वैदुष्यायत्तम् । तच्च शब्दार्थादिषु साध्वसाधुत्वप्रतियोगिकभेदज्ञानाधीनम् । तच्च शब्दादीनां प्रतिपदपाठादिना दुश्शकम् । शब्दादीनामानन्त्यात् । तस्मादुत्सर्गापवादाद्यनुगमकलक्षणेनैव तज्ज्ञानं साध्यम् । तेन लाघवमपि । अत एव महाभाष्ये " बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच । नान्तं जगाम । इन्द्रश्चाध्येता । बृहस्पतिर्वक्ता । दिव्यं वर्षसहस्रमध्ययनस्य कालः । न चान्तं जगाम " इत्युक्तम् । शब्दपारायणम्—योगरूढत्वा तदाख्यशास्त्रविशेष इति कैयटः । एवं च प्रतिपदपाठस्य दुश्शकत्वप्रतिपादकोऽयमर्थवादः । (५) " स्थूलपृषतीमनड्वाहीमालभेत " " इन्द्रशत्रुर्वर्धस्व " इत्यादौ बहुव्रीहिस्तत्पुरुषो वेति सन्देहे पूर्वपदप्रकृतिस्वरेण बहुव्रीहिरिति तु व्याकरणेन सिध्यति । (अत्रेयमाख्यायिका) पुरा किल त्वष्टुर्ब्रह्मणः पुत्रे इन्द्रेण निहते विश्वरूपवधात्कुपितेन त्वष्टाऽऽरब्धे वीन्द्रे सोमेऽनपहूतेनैवेन्द्रेण पीतस्य सोमस्यावशेषं दृष्ट्वा क्रुद्धस्त्वष्ट्रेन्द्रहन्तृवृत्राख्यपुत्रोत्पादनायाऽभिचारिकं यियक्षमाणः आहवनीयमुपप्रावर्तयत्स्वाहेन्द्रशत्रुर्वर्धस्वेति । ततो वृत्र उदभूदिति श्रूयते तैत्तिरीयसंहितायाम् । तदेतच्छ्रुत्वा भीत इन्द्रः ब्रह्मलोकं गत्वा सरस्वतीं तुष्टाव । ततोनुकम्पया सरस्वती त्वष्टुर्मुखादन्तोदात्ते इन्द्रशब्दे प्रयोक्तव्ये तद्वैपरीत्येन पूर्वपदप्रकृतिस्वरवदिन्द्रः शातयिता यस्येत्यर्थकमिन्द्रशत्रुपदमेवोच्चारयामास । ततश्चोत्पन्नो वृत्र इन्द्रेण हत इति ।

(६)—" नानृतं वदेद् " इति श्रुत्या " विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति " इति स्मृत्या चापशब्दोच्चारणे शास्त्रातिक्रमात्प्रत्यवायात् । ततः सुशब्दोच्चारणेन प्रत्यवायाविषयतासंपत्तिर्व्याकरणेन सिध्यति । अत्र विनिगमनाविरहादर्थानृतमिव शब्दानृतमप्यनृतपदेन गृह्यते।अत एव **यद्वानस्तद्वान इति** हेरयो हेशब्दं हेरय इति च प्रयोक्तव्ये **यर्वाणस्तर्वाण इति** हेलयो हेलय इति हे ३ इति प्लुतं विहाय केवलं रेफं विहाय लकारमेव वा कुर्वन्तः पराबभूवुः । तस्मात् " न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः " इत्युक्तं भाष्ये ।

(७)—"शब्दो हीनस्स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोपराधाद्" इत्युक्तरीत्यैहिकदुःखपरिहारोपि फलमित्यनेन ज्ञायते ।

(८)–"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थवित्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा" इति "यदधीतमविज्ञातं निगदेनैव शब्द्यते ॥ अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" "अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः" इति च भाष्यादावुक्तरीत्यार्थज्ञानमन्तरा वेदानुपूर्वीज्ञानस्य निरर्थकत्वोक्तेरर्थज्ञानमावश्यकम् । तच्च व्याकरणाध्येतुः प्रकृतिप्रत्ययार्थज्ञानेन सुसाध्यं, नान्यस्य । अत एव "वेदार्थज्ञो जपं जप्त्वा तथैवाध्ययनं द्विजः । कुर्वन्त्स्वर्गमवाप्नोति नरकं तु विपर्यये" इति व्यासेनोक्तम् ।

(९)–एकस्यापशब्दस्य भूयांसोऽपशब्दाः । संस्कृततदतिरिक्तभाषाशब्दादयः इति यावत् तत्प्रयोगेण दुष्यति । एकस्य सुशब्दस्य प्रयोगे तु न तथा दुष्यति । अनन्तफलमप्नोति तदोषप्राप्तिपरिहारो व्याकरणेनैव सिध्यत्यनन्तफलप्राप्तिश्च । तदेतदुच्यते "यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले । सोऽनन्तमाप्नोति फलं परत्र वाग्योगविद्दुष्यति चापशब्दैः" इति ।

(१०)–प्रत्यभिवादे गुर्वादिभिः स्त्रीभिन्नैः प्लुतः कार्य इति विधिरस्ति । तच्च व्याकरणज्ञानाधीनम् ॥

(११)–"प्रयाजाः सविभक्तिकाः कार्याः" इति विधिवाक्यानुसारेण तत्र वाक्येषु तत्तद्विभक्त्यन्तघटिततयोच्चारणं व्याकरणेनैव सिध्यति ।

(१२) साङ्कव्यञ्जनरूपाक्षरज्ञानं पदज्ञानं वाक्यज्ञानं च व्याकरणज्ञानाधीनम् ।

(१३)–यत्र नामाख्यातोपसर्गनिपातरूपचतुर्विधपदज्ञानं, भूतभविष्यद्वर्तमानतदवान्तराद्यतनानद्यतनकालज्ञानं, व्यङ्ग्यव्यञ्जकशब्दज्ञानं सप्तविभक्तिज्ञानं तत्तद्वर्णिनामुरःकण्ठशिरोरूपस्थानत्रयज्ञानं तत्र मनुष्ये शब्दः प्रविश्य तथा प्रकाशमापेदे इति ज्ञानं व्याकरणज्ञानाधीनम् । तत्रेयं श्रुतिः–"चत्वारिवाग्–" इत्यादि । अथ वा "परापश्यन्ती मध्यमा वैखरी" इति चतस्रो वाचः । तत्र तिस्रो गुहायां मूलाधारस्वाधिष्ठानमणिपूरकाख्येषु स्थानेषु क्रमेण सन्ति । तुरीयां वैखर्याख्यां वाचं मनुष्या मुखेनोच्चारयन्तीत्यर्थः । एवं च वर्णानामुत्पत्तिवृद्ध्यादिक्रमो व्याकरणाधीनः ।

(१४)–बहूनामपि समानपृष्ठोदरपाणिपादानां वेदवेदाङ्गादिकमधीयमानानां स्वभ्यस्ताध्ययनेऽपि सूक्ष्मबुद्धिरपि कश्चित्पदशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थेनैनां न पश्यति न जानाति वाचम् । अर्थपरिज्ञानमेव हि वाचां फलम् । एकः शृण्वन्नपि न शृणोत्येनाम् । य एव हि सम्यगर्थं जानाति स एवैनां वाचं जानाति शृणोति च । तत्रेयं श्रुतिः–"उत त्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वँ३ विसस्रे जायेव पत्य उशती सुवासाः" इति । अर्थो हि वाचश्शरीरम् । प्रातिपदिकाद् धातोश्चार्थादौ प्रत्ययानां विधानात् । तच्च ज्ञानं व्याकरणज्ञानाधीनम् ।

(१५)–सुशब्दापशब्दसमूहात्परिशोध्यापशब्दान्विहायैव सुशब्दसंपत्सम्पादनं व्याकरणज्ञानाधीनम् । तदाह श्रुतिः–"सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायस्सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि" इति ।

(१६)—आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्ती स्यात् । तदनिष्टपरिहारश्च व्याकरणज्ञानाधीनः ।

(१७)—दशम्युत्तरकालं जातस्य पुत्रस्य नाम विदध्याद्घोषवदाद्यन्तरन्तःस्थमवृद्धं तत्संबन्धित्रिपुरुषान्यतमाभिधायि शत्रोर्मनुष्यस्य वा यन्नाम न भवति, किन्तु देवतादेः तथाभूतं द्व्यक्षरं चतुरक्षरं वा कृदन्तं नाम कार्यम् । न तद्धितान्तमिति विधिविहितरीत्या नामकरणज्ञानं व्याकरणज्ञानाधीनम् ।

(१८)—यो व्याकरणज्ञः स शब्दान् यथेच्छं विनियोक्तुं शक्नोति, नान्य इति तदेतदपि व्याकरणज्ञानाधीनमिति च महाभाष्ये स्पष्टमिति दिक् ॥

तज्जिज्ञासुरधिकारी । प्रतिपाद्यप्रतिपादकभावादिस्संबन्ध इति ज्ञेयम् ।

वेदोपाङ्गानि तु—"पुराणं न्यायो मीमांसा धर्मशास्त्रम्" इति । (**पुराणं**) द्विविधम्—महापुराणमुपपुराणं चेति । एकैकं पुनरष्टादशधा भवति । तच्चोभयं व्यासकृतम् । व्यासाः—बहव इत्युक्तमित्यन्यत् । **न्यायः**—पदार्थानां सर्वेषामनुगमरूपेण प्रकाशकः काणादादिमहर्षिप्रणीतो ग्रन्थः । **मीमांसा**—वेदार्थकर्मनिर्णायको ग्रन्थः । स च प्रकारः किञ्चित्प्राक् संक्षेपेण निरूपितः । **धर्मशास्त्रम्**—मन्वादिमहर्षिप्रणीतः **स्मृत्यादिरूपो ग्रन्थ** इत्यलम् ।

अथ वेदवेदाङ्गयोरध्ययनादिकालो निरूप्यते—

"श्रावण्यां प्रौष्ठपद्यां वा छन्दांस्यधीयीत मासान्विप्रोऽर्द्धपञ्चमान्" ॥ ४ । ९५ ॥ "ततः परन्तु छन्दांसि शुक्लेषु नियतः पठेत् । वेदाङ्गानि रहस्यं च कृष्णपक्षेषु संपठेत्" ॥ ४ । ९८ ॥ इति मनूक्तेः । स्मृत्यन्तरं च "इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीत" इति स्मृत्यन्तराद्युक्तेश्च श्रावण्यामुपाकर्मपक्षे तत आरभ्य, प्रौष्ठपद्यामुपाकर्मपक्षे तत आरभ्य सार्द्धचतुर्मासपर्यन्तं वेदाध्ययनं कार्यम् । "पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः । माघशुक्लस्य वा प्राप्ते पूर्वार्द्धे प्रथमेहनि ॥ ४ । ९६ ॥ यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः । विरमेत्पक्षिणीं रात्रिं तदैवैकमहर्निशम्" ॥ ४ । ९७ ॥ इति मनूक्तेः सार्द्धचतुर्मासान्तर्गतान्तिमपक्षान्तगतदिनेषु यत्र पुष्यः तत्रोत्सर्गः कार्यः, माघशुक्लस्य प्रथमेहनि प्रौष्ठपद्यां येनोपाकर्म कृतं तेनोत्सर्गः कार्य इत्यर्थः एवमुत्सर्गादित्रिदिनानध्यायानन्तरं शुक्लपक्षेषु वेदान्, कृष्णपक्षेषु तत्रानध्यायेष्वपि वेदाङ्गानि चाधीयीत । पठेदित्युक्ते वेदाङ्गानामुक्तकालेष्वप्यध्ययनं सिद्धमिति दिक् ।

(अङ्गाध्ययनादिषु नानध्यायदोषो भवति)—

"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः । न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेद्" इति "नित्ये जपे च काम्ये च क्रतौ पारायणेपि च । नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृतः" इति च क्रमेण कौर्मशौनकीययोर्वचनात् ।

अथ वेदतदङ्गोपाङ्गाध्ययनाध्यापनविध्यादयः ।

नन्वस्तु वेदाङ्गत्वं व्याकरणस्य । तदध्ययने वेदाध्ययने वा प्रवृत्तिः कुतः स्यादिति

चेद् ॥ अत्रोच्यते ॥ "ब्राह्मणेन निष्कारणेन षडङ्गो वेदोध्येयो ज्ञेयश्च" इति श्रुत्या, "द्वे विद्ये वेदितव्ये परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणवेदश्शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्" इति मुण्डकश्रुत्या, "स्वाध्यायोध्येतव्यः" "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इति श्रुतिभ्यां "छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते" इति शिक्षावाक्येन, "द्वे च विद्ये वेदितव्ये इति चाथर्वणी श्रुतिः । परया त्वक्षरप्राप्तिः ऋग्वेदादिमयी परा" इति विष्णुपुराणोक्तया, "द्वे च विद्ये वेदितव्ये परा चैवापरा द्विज । ऋग्यजुस्सामाथर्वाख्यो वेदा अङ्गानि षड् द्विजाः । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा । छन्दश्शास्त्रं च मीमांसा धर्मशास्त्रं पुराणकम् । न्यायो वैद्यकगांधर्ववेदार्थशास्त्रकम् । अपरेयं परा विद्या तया ब्रह्म निगद्यते" इत्याग्नेयोक्तया च, यथा "अहरहस्सन्ध्यामुपासीत" इत्यादिश्रुत्या सन्ध्यावन्दनादिकं दृष्टफलाश्रवणेपि कारणमनपेक्ष्यैव कर्त्तव्यत्वेन विधीयते, तथा वेदवेदाङ्गतदुपाङ्गाध्ययनमपि कारणमनपेक्ष्यैव ब्राह्मणस्य कर्तव्यत्वेन विधीयते । किंच "सत्यान्मा प्रमदः" "सत्यं वद" "नानृतं वदेद्" इति श्रुतिभ्यः "न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः" इति भाष्याद् याज्ञे कर्मण्यपशब्दोच्चारणे "सारस्वतीयामिष्टिं निर्वपेद्" इति श्रुतेः "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" इति स्मृतेश्च कर्त्तव्येन विहितस्य वेदतदङ्गाध्ययनस्याकरणेऽविहितस्यापशब्दस्योच्चारणे सुशब्दस्यानुच्चारणे वा सत्यप्रमादादिजन्यप्रत्यवायजन्यापूर्वद्वारकानिष्टमयोत्पत्त्यापत्तेस्तन्निवृत्तये तदध्ययनं विहितम् । किञ्च " यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् । स वै दुर्ब्राह्मणो ज्ञेयः सर्वकर्मबहिष्कृतः " इति स्मृतेः "योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः " इति स्मृतेः "द्विजातीनामध्ययनमिज्या दानमिति ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियमः " इति गौतमोक्तेः, "तपो दमो दया दानं सत्यं धर्मश्रुतं घृणा । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् " इति स्मृतेः, " वेदः कृत्स्नोधिगन्तव्यस्सरहस्यो द्विजन्मना । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्याशु विनश्यन्ति " इति मनुस्मृतेश्च द्विजानां श्रुतविद्याद्यध्ययनाध्यापनाग्निहोत्राचरणदानतपोदमदयासत्यविज्ञानसंपादनास्तिकत्वान्यावश्यकानि भवन्ति। किं च "शास्त्रं सुनिश्चितमपि प्रतिचिन्तनीयमाराधितोपि नृपतिः परिशङ्कनीयः । अङ्के स्थितापि युवतिः परिपालनीया शास्त्रे नृपे च युवतौ च कुतो वशित्वम् " इति नीतिकदुक्तेरावर्तनादिकं चात्यावश्यकम् । "विद्या विहीनः पशुः " इत्युक्तिरप्युक्ताशयेनैव । एवं चैतदध्ययनं ब्राह्मणस्य नित्यमिति सिद्धम् ॥ तथा काम्यत्वमपि—"एकश्शब्दस्सम्यग्ज्ञातः सुष्ठु प्रयुक्तश्शास्त्रान्वितस्स्वर्गे लोके कामधुग्भवति" इति श्रुत्या मतान्तरे स्मृत्या " अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्राणि विद्या ह्येताश्चतुर्दश " " पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश " इति च स्मृतिभ्यां धर्मादिकाम्यफलसम्पादकत्वोक्तेः ।

अत एव " यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् । तावुभौ पुण्यकर्माणौ पंक्तिपावन-पावनौ " इति " यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले । सोनन्तमाप्नोति फलं परत्र वाग्योगविद्दुष्यति चापशब्दैः—" इति " नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः । अथ पत्काषिणो यान्ति येचीकमतभाषिणः " इति च महाभाष्यं " पातं जले विष्णुपदाय-गायाः पातञ्जले चापि न येवगाहम् । आ च क्षतेरशुद्धिदमा प्रसूतेराचक्षते रागमधोक्षजे च " इत्यभियुक्तोक्तं च संगच्छते । अत एव " आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः । महर्षयो व्याकरणं निराहुः " इति स्कान्दोक्तं संगच्छते ॥

" अष्टवर्षं ब्राह्मणमुपनयीत । तमध्यापयीत " इति ब्राह्मणस्याध्यापनविषयेपि विधिर्जागर्ति तथा द्विजानामध्यापनाधिकारेपि विधिर्भवति—" वेदाभ्यासं ततः कुर्यात्प्रयत्नाच्छक्तितो द्विजः । वेदमध्यापयेच्छिष्यान्धारयेच्च विचारयेद् " इति व्यासेन "मन्त्रार्थज्ञो जपञ्जुह्वंस्तथैवाध्यापयन्द्वि-जः । स्वर्गलोकमवाप्नोति नरकं तु विपर्यये" इति हारीतेन चोक्तेः ।

अध्यापनं त्रिविधं—धर्मार्थमर्थार्थं शुश्रूषार्थं चेति । "अध्यापनं च त्रिविधं धर्मार्थं चार्थ-कारणात् । शुश्रूषाकरणं चेति ऋषिभिः परिकीर्तितम् । एषामन्यतमाभावे मृषाचारो भवे-द्विजः "इति हारीतोक्तेः ।

अन्येभ्यो नीचेभ्योपि क्वचिदध्ययनादीनि कार्याणि । अत एव "अब्राह्मणाद्ध्ययनमापदि शुश्रूषानुव्रज्या च यावदध्ययनम" इति बोधायनेन "अब्राह्मणाद्ध्ययनमापत्काले विधीयते । अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः" इति मनुना चोक्तम् ।

शुभा विद्या उत्तमान्नीचाद्वा वर्णादपि संग्राह्या एव । तदाह मनुः "श्रद्दधानश्शुभां विद्या-मादद्यादावरादपि । अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि । विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् । अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् । स्त्रियो रत्नान्यथो विद्याधर्मश्शौचं सुभाषितम् । विविधानि च शिल्पानि समादेयानि सर्वतः" इति । **न चावरादित्यस्य गुणर-हितादित्यर्थ इति वाच्यम्** । एवं सति याज्ञवल्क्यादीन्प्रति जनकेनौपनिषदानामर्थानामुपदेशा-सङ्गत्यापत्तेः ॥ **वस्तुतस्तु** तत्र यथा जनकेन निवेदितमेव न तूपदिष्टं तद्वदेवावरादपि ग्राह्यमिति **कश्चित् ॥ अन्ये तु** नीचादपि प्रागुक्तरीत्योपदेशो भवत्येवान्येभ्य **इत्याहुः** ।

स्त्रियोपि विद्याध्ययनाध्यापनयोरधिकारिण्यो भवन्ति—

" ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च " इत्युक्तेः । " अष्टवर्षं ब्राह्मणमुपनयीत तमध्या-पयीत " इत्युक्तेश्च । अत्र ब्राह्मणपदं जातिपरम् । तेन ब्राह्मणजातीयानां पुंसामिव स्त्रीणामपि तज्जातीयानां तदध्ययनमध्यापनं च भवति अत एव " अथ य इच्छेद्दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै " इति बृहदारण्यकश्रुतौ, तथा गार्गीमैत्रेयीभ्यां श्रुत्यध्ययनस्य तदर्थावगमस्य च तत्रैव, "तथा गार्गी च मैत्रेयी तत्र तीर्थे महत्तरे । वेदतीर्थाभिधे स्नानं कृत्वा पर्वणि केशव " इति स्कान्दे सूत-संहितायाम्, " अतीतकाललिखितं न स्यात्तत्साधनक्षमम् । स्त्रिया चैवाप्रगल्भेन बलात्कारेण

यत्कृतम्" इति शुक्रनीतौ, "कन्या सती देवमर्कमाजुहाव यशस्विनी" इति महाभारते आदिपर्वणि सप्तषष्टितमे (६७) अध्याये, " स्त्रीणां प्रव्रजितानां तु करशुल्कैर्विवर्जयेद् " इत्याग्नेये, "विद्वज्जनवन्दिता सीता प्राह—" इति "विपुलहृदयैकवेद्ये—खिद्यति शास्त्रे जडो न सौख्यैं स्वे । निन्दति कञ्चुकिकारं प्रायश्शुष्कस्तनी नारी " इत्यादेर्भोजप्रबन्धादौ, " शतपथिकी " "काशकृत्स्ना " " उपाध्याया " " आचार्याणी " इत्यादीनां महाभाष्यादौ चोक्तिः संगच्छते । प्रागुक्तरीत्या " नानृतं वदेद् " इति निषेधस्य सर्वसाधारणत्वाच्च । आचार्यशुश्रूषणादिनियम एव स्त्रीणां नेत्यभिप्रायेण निषेधविध्यादयः प्रवृत्ताः । अत एव "द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्येति । सद्योवधूनामुपस्थिते विवाहे कथंचिदुपनयनमात्रं कृत्वा विवाहः कार्यः " इति हारीतेनोक्तं संगच्छते इति दिक् । शूद्रास्तु—नाधिकारिणः वेदतदङ्गाध्ययनादौ विना विशेषविधिं भवन्ति । यथा—निषादस्थपत्यादयः ॥

परे तु " पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते । अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥ वर्जयेदजिनं चीरं जटाधारणमेव च " इति यमोक्तेः, "अश्मारोहणमारभ्य स्त्रीणां गौर्यर्चनं परम् । पुराणपठनं श्रेयो न वेदाध्ययनादिकम् " इत्यादि स्मृतेश्च स्त्रीणां वेदतदङ्गाध्ययनादिकं नेत्याहुः ॥

अथाध्ययनाध्यापनप्रकारः किञ्चिद्विचार्यते—

" अभ्यासार्थं द्रुता वृत्तिः प्रयोगार्थं तु मध्यमा । शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता " इति " गीती शीघ्री शिरःकम्पी तथाऽलिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः" इति च शिक्षायाम् "सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदास्साङ्गाः सरहस्याः " इति " अनधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिद् " इति च महाभाष्ये " वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । तदानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा " इति " पारायणं वर्तयेद्ब्रह्मचारी गुरुः शिष्येभ्यः समनुव्रतेभ्यः । अध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा ॥ एकः श्रोता दक्षिणतो निषीदेद्वौ वा भूयांसस्तु यथावकाशम् " इति च शौनकीये नानारूपेण लोकहितायोपदिष्टानप्यर्थान्प्रायः स्वयमपरीक्ष्यैव साहसेन शिक्षाद्युक्तानर्थानुपदिश्यैव काव्यं शास्त्रं वेदान्वाध्यापयन्त्यधीयते चास्मत्पाठकाः । व्याकरणेनैव लोकवेदशास्त्रपुराणागममन्त्रतन्त्रकाव्यनाटकालङ्कारादियावद्विद्यागतानां कलागतानां त्रैकालिकग्रंथादिगतानां सुशब्दानां विभक्त्यादेः व्याकरणपित्रैव संस्कार्यतया तदर्थज्ञानमन्तरा संस्कारस्याशक्यत्वमित्यादित आरभ्य सूत्रतदुदाहरणप्रत्युदाहरणलिङ्गानुशासनगणपाठादिस्थपदानां संस्करणादिसमये लोकवद्धेतुसाध्यपक्षादिकानां तत्तद्यज्ञपदार्थतत्संस्काराणां सांख्ययोगादिस्थप्रधानपुरुषेश्वरतत्त्वादिकानामर्थानां ज्ञानस्य तद्वाचकशब्दज्ञानस्य च शिक्षणावश्यकत्वेपि तद्रहितास्स्म । तदिदं दौर्भाग्यमल्पज्ञानामध्यापकत्वेन प्रायः परिकल्पनामूलम् । तस्माद्भारत-

शासिनस्सर्वे वयं तैर्वञ्चिताः । अन्यथा व्याकरणस्य प्रयोजनत्वेन सप्तद्वीपा वसुमती त्रयो लोका इति महाभाष्यकृतामुक्तिः कथं संगच्छतामिति सुधियो विभावयन्तु । किं च "आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया" इत्युक्तेरर्थज्ञानानन्तरं शब्दप्रयोग इति सिद्धेपि तदुभयोस्सम्बन्धज्ञानमन्तरा तदसम्भव इति स्पष्टमेव । किञ्च शिक्षामेव स्वतोऽविचारयन्तोपि शिक्षयन्तीति विचित्रमेतत् । तस्मादस्मदीयमेतादृशं पल्लवपाण्डित्यं ज्ञात्वाऽस्मांस्तृणायान्ये न मन्यन्त इति तथैवाग्रेप्यन्धपरम्पराप्रचारे ब्राह्मणानामस्माकं कान्यागतिर्भवितेति च विचार्य त्रिमुनिगुणगभीरं पाण्डित्यं संपाद्यमिति पर्यालोच्य चैकस्यैव सूत्रस्य दिनत्रयेण दिनपञ्चकेन वा यावज्ज्ञानं यथा स्यात्तथा सर्वैर्यतितव्यम् । तच्च ज्ञानमुपदेशाधीनं लोकानुभवाधीनं चेति तदुभयं परित्यज्योत्पथगामिनामस्माकं हानिः का वा न भवेत् । शब्दशास्त्रमहारत्नापणात्कानिकानिचिदल्पाल्पानि रत्नानि संगृह्य नैयायिकादयो महापणिकास्संवृत्ताः, कुतो वा शाब्दिका महामहापणिका अप्यधमर्णिन इव संवृत्ता इति मात्सर्यं दूरत उत्सार्य विचिन्तनीयमविस्मरणीयं चेति अस्मन्महामान्यान्पण्डितानहमभ्यर्थये, न तु दूषय इति दिक् ।

(प्रकृतमनुसरामः ।)

ननु सिद्धान्तकौमुद्याः किं प्रयोजनम् । यतो महाभाष्यादिबहुग्रन्थानां सत्त्वात्तैः सिद्धान्तकौमुदी गतार्थत्वादेतत्प्रयासो व्यर्थ इति चेदत्राहुः । महाभाष्यादिग्रन्थानां गम्भीरत्वेन ततः सिद्धान्तज्ञानस्य दुर्ज्ञेयत्वेनान्येषां काशिकादिग्रन्थानां प्रक्रियाकौमुद्यादीनां च प्रायः महाभाष्यविरुद्धार्थबोधकत्वेनास्याश्चानायासेन बालानामपि महाभाष्याद्यविरुद्धतदुक्तसकलसिद्धान्तार्थबोधकत्वेन सार्थक्यमिति दिक् ।

॥ इति पूर्वो भागः समाप्तः ॥

अथोत्तरो भाग आरभ्यते ।

अस्ति किल प्रसिद्धमनन्तशयनाख्यं नगरं श्रीरामेश्वरक्षेत्रान्नातिदूरे वेलातटे । यत्र नगरे श्रीभगवाँल्लक्ष्मीपतिरागमान्तकान्तारसंचारवशाच्छ्रान्त इवानन्तशयनमधिशेते । तत्र कदाचिन्निद्रां यौगिकीमास्थितस्य भगवतो वपुर्गौरवमाप । तस्याऽऽकस्मिकस्याऽसहिष्णुं बहुधा क्लिश्यन्तं शेषं वैनतेयोऽद्राक्षीदप्राक्षीच्च—किमभूतपूर्वस्त्वं दृश्यसे इति । इत्थं वदन्नेव यदासीत्, तदैव ततोप्यतिप्रवृद्धं भगवच्छरीरं तेनैव गौरवेणातिडोलायितशिरोवृन्दं शेषं चामिवीक्ष्य तद्भङ्गभिया द्रुतमागत्य विशालाभ्यां स्ववाहुभ्यां तं जग्राह लक्ष्मीश्च तद्भयेनैव सरसीरुहाक्षस्य करे स्वकराम्बुजमाकलयांचकार । तेन सोपि महान्तमानन्दमवाप्य चक्षुषी उन्मीलयामास । ततस्तदैवासीदतिलघु तद्वपुः । तदतिमोदेनानन्तेन बिभरांबभूवे । अत्याश्चर्येण तदुभयं वीक्ष्य लक्ष्मीर्वैनतेयश्च तदीयकृपापूर्णकटाक्षवीक्षणेनातीव हर्षमापतुः । शेषोपि तं प्रणिपत्य प्राञ्जलिस्तद्वपुषो गौरवहेतुं पप्रच्छ । सोवादीच्च तम् । योगनिद्रामाश्रितेन मया नटराजराजस्य महनीयं

विचित्रतरं नृत्तं ददृशे । तदीयविचित्रतराश्रुतदृष्टपूर्वनृत्तदर्शनजनितपरमानन्दाम्बुधिनिमज्जनान्निरुद्धनिःश्वासतया मत्स्यशरीरेण गौरवमासादितम् । येन त्वमतीव क्लेशितोसि । किं च नर्तनावसाने मन्मुखेन त्वां कात्यायनकृतस्य पाणिनेर्वार्तिकग्रन्थस्य महाभाष्यं कर्तुं स आज्ञापयति स्मेति । ततस्तद्भगवन्नृत्तदर्शनकुतूहलेन पुनःपुनः प्रणिपत्य तद्याचमानं प्राञ्जलिमनन्तं तद्दर्शनाय गन्तुमाज्ञापयामास ।

ते पाणिन्यादयः के ? तेषां ग्रन्थाः के ? कुत्रत्याश्चेति चेद्यथाप्राप्तं तन्निरूप्यते—तथा हि **पणिनामा** कश्चिन्महर्षिरवाप **पाणिनं** नाम कुमारम् । स पाणिनो दाक्षीमुदूह्य तस्यां पाणिनिनामानं तनूजमजनयत् । अतिक्रान्तबाल्यः पाणिनिर्विद्याग्रहणयोग्यं वयः प्राप्य नन्दराजराज्यकाले तद्राज्ये निवसन्तमुपवर्षनामानं पण्डितवरिष्ठमुपजगाम विद्यासम्पत्तिलाभाय । तत्रास्य सब्रह्मचारिणौ वररुचिव्याडिनामानावास्ताम् । स कदाचिद्वादे पराजितो निर्वेदमवाप्य व्याकरणविद्यासाम्राज्यलाभाय सर्वविद्याधिपमीशानं तपसाराद्धुं निश्चित्य प्रयागक्षेत्रं गत्वाऽक्षयवटस्यावोभागेतितीव्रं तपश्चक्रे । यत्र स्वस्वेष्टार्थसिद्धये सनकादयोपि सिद्धाः परमेश्वरं तपसोपासां चक्रिरे । चिरात्कदाचित्कठोरतत्तत्तपश्चर्यापरितुष्टस्तत्तदभीष्टवरान्प्रदित्सुर्भगवान्नाट्यरङ्गतलमधिष्ठाय नृत्यन्नादयामास चतुर्दशकृत्वो ढक्काम् । स नादो यथान्यैः श्रवणपथेन स्वस्वाभीष्टसाम्राज्यप्रापकवरदानवाक्यामृतत्वेन पीतस्तथा पाणिनिनापि स्वेन करिष्यमाणं यद् "अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः" इत्युक्तलक्षणलक्षितसूत्रसमूहरूपो सधातुपाठगणपाठयुक्ताष्टाध्याय्यात्मको ग्रन्थः लिङ्गानुशासनं चेत्येतन्मूलभूतचतुर्दशसूत्रात्मकव्याकरणाम्नायाङ्गविद्यासाम्राज्यप्रापकवरदानवाक्यामृततयापीयत । तदुक्तं नन्दिकेश्वरकृतकाशिकायाम्—"नृत्ताऽवसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामस्सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्" इति । ततोऽनेन स्वलब्धव्याकरणमूलभूतोक्तसाम्राज्यतेजोबलेन पाणिनिः—"बृद्धिरादैच्" इत्यादिकानि "अ अ" इत्यन्तानि सूत्राण्यष्टाध्याय्यात्मना, लिङ्गानुशासनसूत्राणि षडविकारात्मना, तत्तत्सूत्रेषु गणशब्दपाठांस्तत्रैव गणपाठेर्थानर्थविचित्रचित्रचित्रितं कण्ड्वादिना सहैकादशगणं धातुपाठं यजुर्वेदस्य प्रातिशाख्याख्यं सूत्रग्रन्थं तथा शब्दोच्चारणक्रमनिर्णायिकां दशखण्डात्मिकां शिक्षां तथा जाम्बवतीपरिणयाख्यं पातालविजयापरनामकं काव्यग्रन्थं च चकार । यत एव "वरतनु सम्प्रवदन्ति कुक्कुटाः" इति व्यक्तवाचामित्यत्र महाभाष्ये कस्यचित् श्लोकस्य भागः प्रत्युदाहरणत्वेन गृहीतः ।

अन्ये त्विदं पाणिनीयशिक्षा न पाणिनिकृता । यतः "अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा" इत्यादावन्तेपि—"येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः" ॥ ९७ ॥ "अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः" ॥ ९८ ॥ "त्रिनयनमुखनिस्सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः । स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीलि

दिवीति" ॥ ९९ ॥ (?) इति शिक्षायां "प्रवक्ष्यामि पाणिनीयं मतं यथा" इति "तस्मै पाणिनये नमः" "त्रिनयनमुखनिस्सृतामिमाम्" इति चोक्तेः । पाणिनिकर्तृकत्वे तदनुपपत्तेश्च । एवं च पाणिनिकृतां नष्टां दुर्लभां वा पर्यालोच्य तदुपदेशपरम्परागतेन तदीयशिष्येण तदुक्तार्थ-प्रतिपादिकेयं पाणिनितोन्येन त्रिनयनाख्येन केनचिद्विदुषा **कृतेत्याहुः** । **अन्ये तु** पुराणादिषु "व्यास उवाच" इति "व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् । पराशरात्मजं वन्दे" इति वचार्षग्रन्थानामेष स्वभाव इत्यदोषः । **एतेन** याज्ञवल्क्यस्मृतिर्न तेनोक्तेति मिताक्षरोक्तिः परास्तेत्याहुः ॥ अस्याशिक्षाया राघवाचार्यकृतं भाष्यं जागर्तीति दिक् । एवं सगणांश्चतुर्ग्रन्थान्विरचय्याध्यापनादिना प्रचारयन्कालक्रमेण सर्वत्र प्रथयामास । अयं कुत्रत्य इति न ज्ञायते ।

तत आगत्य स्वकृतं व्याकरणशास्त्रं स्वगुरूपवर्षादिभ्यः श्रावयामास । तत्र कौशाम्बी-नगरवासिनः सोमदेवशर्मणो वसुदत्तायामुत्पन्नोऽभ्यस्तसकलशास्त्रः कात्यायनस्तदुपश्रुत्य चित्रितहृदयोसूयामाश्रित्येशानानुग्रहेण तादृशविचित्रग्रन्थरचनापर्युत्सुकस्स्वयमध्याश्रमं कंचिद्भूत्वा तपसा परमेश्वरमाराधयामास । ततस्तदनुग्रहेण वार्तिकाख्यं (वाक्यात्मकं) पाणिन्यनुक्तार्थपरिपूरकं दुरुक्तपुनरुक्तादयर्थनिरासकं च ग्रन्थमकरोत् ।

एवमन्यानपि कात्यायनसूत्ररुचिप्रयोगलक्षश्लोकात्मकबृहत्कथादीन् ग्रन्थान्निर्माय काणभूत्यादिभ्यः श्रावयित्वाऽऽरुरोह नन्दराजराज्यसाचिव्यपदम् । यस्य बृहत्कथाग्रन्थस्य सारं संगृह्य सोमदेवभट्टेन कथासरित्सागराख्यो ग्रन्थो व्यरचि । तामुपश्रुत्य पाणिनिः स्वव्याकरणन्यूनताप्रदर्शकवार्तिक (वाक्य) ग्रन्थनिर्मितिमसूयन्कात्यायनमहर्षेराश्रममाजगाम । आगत्य च तमर्घ्यपात्रेण प्रत्युद्गच्छन्तमवगणय्य यतो महेश्वरानुग्रहपात्रभूतेन मया कृते शास्त्रेनुक्तदुरुक्तपुनरुक्तादिदुश्चिन्ताकुलेन त्वया वाक्यग्रन्थः कृतस्तेनापराधेन त्वमचिरात्पतिष्यसीति शशाप । सोपि तं यतो वाक्यग्रन्थं शङ्करप्रसादपरिणामरूपमजानंस्त्वं मह्यमशपस्ततस्त्वच्छिरोप्यचिरात्पतत्विति शशाप । ततस्तत्रैवारण्ये तस्यामेव त्रयोदश्यां तिथौ पाणिनिर्गच्छन्केनचिद्व्याघ्रेण व्यापादितः कैलासं जगाम । तदुक्तं विष्णुगुप्तेन "सिंहो व्याकरणस्य कर्तुरहरत्प्राणान्प्रियान्पाणिनेर्मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् । छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलं ह्यज्ञानावृतचेतसामतिरुषां कोर्थस्तिरश्चां गुणैः" इति पञ्चतन्त्रे मित्रप्राप्तिनामकद्वितीयभागे । यः पञ्चतन्त्रग्रन्थ आङ्गलपञ्चशतकात्परं नोत्पन्न इत्यांग्लपण्डितानां सिद्धान्तविषयः । एवं कात्यायनोपि तस्यामेव तिथौ कैलासगमनाय देहं तत्याज । तं कालमारभ्य वैयाकरणास्त्रयोदश्यां व्याकरणशास्त्राध्ययनाध्यापनव्यवहारमत्याक्षुः । यत्कृतस्य वार्तिकग्रन्थस्य दुर्बोधस्य महाभाष्यं कार्यमिति श्रीशङ्करः श्रीविष्णुमुखेन पतञ्जलिमाज्ञापयामासेत्यनुपदमेवोक्तम् । ततो भगवदनुज्ञामवाप्य तस्माच्छ्रीनटेश्वरनृत्तदर्शनाय चिदम्बरं गच्छेति शेषांशेन त्वमवतरेति चाज्ञप्तस्तं प्रणम्य निर्जगाम । ततस्सवार्तिकं पानिनिव्याकरणं पाणिनिशिष्येण व्याघ्रभूतिना कात्यायनशिष्येण श्वोभूतिनाचाऽध्यापनद्वारेण प्रकटितं जगद्विख्यातं च बभूव ।

एवं वेतसपुरनिवासिनः करम्भशर्म्मणस्तनूजो व्याडिरपि पाणिनिव्याकरणे संग्रहाख्यमति-विस्तृतं ग्रन्थमन्यान्बहून् ग्रन्थांश्चकार ।

ततो लोकानां राजाद्याश्रयमदमत्ततया सांसारिकापारक्लेशबहुलतया द्यूतादिदुर्व्यसनमग्न-तया, राजचोराद्युपद्रवबाधाबाधिततया वेदवेदाङ्गाद्यध्ययनाध्यापनप्रचारेषु रविवदस्तमुपगतेषु पाणिनिकात्यायनव्याडिकृतेषु व्याकरणग्रन्थेषु नाममात्रावशिष्टेषु " हठादाकृष्टानां कतिपय-पदानां रचयिता कविस्पर्द्धालुश्चेदहह कविना वश्यवचसा । भवेदद्य श्वो वा प्रकृतिकुटिले पाणिनि कलौ घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः" इत्यभियुक्तोक्तरीत्या पामरचक्षुषां मोहमस्मयदाचरमाणेषु सकलमूलग्रन्थविप्लवनपटुतरकौटिल्यविषप्रोल्लसन्नवनवकलिराज्यधुर-न्धरप्रबलपण्डितम्मन्यमुकुटकृतेषु व्याकरणाभासादिग्रन्थेषु खद्योतवदितस्ततो विजृम्भमानेषु महाभाष्यरचनाय भगवदाज्ञतो भगवाञ्छेषः स्वावतरणयोग्यं स्थानमन्विष्यन्कंचिदुत्तमं तापसा-श्रममद्राक्षीत् । ततः प्रविश्य तं गोनर्ददेशा (तीरा) न्तर्गतमाश्रम तत्र प्राज्ञपुत्रार्थं चिरात्त-पस्यन्तीं गोणिकां सौशील्यादिगुणैः स्वमातरं विचिन्त्य समयमन्विष्यंस्तस्थौ । सा चार्घ्यदानाय तत्परिगृह्य यावत्तमभिदध्यौ सहस्रांशुं तावत्तेन प्रेरितोयमनन्तस्तद्धस्तधृतेर्घ्यजले प्राविशत् ।

ततस्सा तस्मै अर्घ्यमुन्निन्ये । तत्क्षणमेव तेनार्घ्यजलेन सह तापसाकृतिरहिर्भुवमा-जगाम । दृष्ट्वा च तं नवार्कमिव दक्षिणं भयात्कोर्मबानिति पप्रच्छ । सोपि चातुर्येण सपो-हमिति प्रत्युवाच । तथा तेन वाक्येन चित्रितहृदयया सर्पोहमिति वाच्ये रेफं विहाय तथोक्तेः कारणं किमित्याशयेन रेफः क्व गत इति पृष्टः त्वयापहृत इति प्रत्यब्रवीदिति केचित् ।

अन्येतु पाणिनिनाऽन्येन केनचिन्मुनिना वार्घ्यं दत्तम् । तदेदं सर्वं वृत्तं समजनीति ब्रुवते ।

ततस्तमर्कदत्तं पुत्रं मन्वाना सूर्य्युपाद्राय परमानन्दमवाप्य सर्वेषामपि तपःक्लेशानां विसस्मार । सोपि मातरं तां पतञ्जलिनाम्ना प्रणनाम । ततो महेश्वराराधनाय तपसे जिगमि-षुर्मातरं मनसा यदा चिन्तयसि तदाऽऽगन्तेति बहुधा समाश्वास्य गत्वा च दक्षिणोदधितटं तीव्रं तपश्चचार । तेन तुष्टः सोमं वृषमारुह्य दर्शनपथमवतीर्णं प्रणम्य प्राञ्जलिः बहुधा स्तुत्वा कमलासनोक्तं सर्वं सविनयं विज्ञाप्य वाक्यग्रन्थस्य भाष्यनिर्माणे पाटवं, भगवन्नाद्यदर्शने योग्यतां च स्वयमभ्यर्थयते स्म । ततस्स चिदम्बरक्षेत्रे नटेशदर्शनं कुरु पाणिनिवाक्यभाष्यरचने सामर्थ्यं च ते भवत्विति वरं दत्त्वान्तरधात् । अथ स मुनिर्वेलातटारण्यपथेन चिदम्बरं चिदम्बर-मिव स्थितं नटेशनृत्तदिदृक्षुभिस्संकीर्णं प्रविशन्नेव समाधिनैवैतत्प्रभावमभिजानता माध्य-न्दिनकुलतिलकेन व्याघ्रपान्मुनिना दृष्टोर्घ्यपाद्यादिभिरुपस्कृतः तत्तपःकुशलं पप्रच्छ अजा-नाच्च तदुक्त्या तत्कुशलम् । ततः पतञ्जलिर्व्याघ्रपदा गिरिशताण्डवसभामतिविचित्रां प्रविश्य यावदास्थितः तावत्कैलासाच्छीमान्नटेशो वृषमुमया सहाधिरुह्याजगाम भक्तानु-जिघृक्षया । आगतं च तं सर्वे प्रणिपत्य तन्नृत्यदिदृक्षां सविनयं व्यजिज्ञपन् । ततस्तृतो वतीर्य समामागच्छतानेन भगवता व्याघ्रपदा सह स्तवोन्मुखः पतञ्जलिर्दृष्टः स्वनृत्तं पश्येत्याज्ञप्तोन्यैस्सह तद्दर्शनयोग्यदिव्यदृष्टिदानेन संमानितश्च तैस्सहायमवाप्य दिव्यदृष्टिः तत्कटाक्षपातक्षणमात्रपरिगृहीतमर्दलादिकैस्सरस्वत्यादिभिश्शोभितं परमानन्देन नटेशस्य

नाट्यमदृष्टपूर्वमपश्यत् । ततस्संस्तुतो नटेशः फणिपतिं पाणिनिवाक्यग्रन्थस्य महाभाष्यं निर्माय दिवं व्रजेत्याज्ञाप्यान्तरधात् । अथ तौ व्याघ्रपात्पतञ्जली यत्र स ननृते तत्र तत्प्रतिकृतिं लिलिखतुः । तदादि तच्चिदम्बरेशप्रतिकृतिदर्शनेनेदानीमपि कुटिले कलौ लोका निष्कल्मषा भूत्वाऽनुत्तमं पुरुषार्थमनायासेनोपलभन्ते । नटेशनृत्तं स्मारंस्मारमतीव चित्रीयमाणहृदयः पतञ्जलिर्लोकहितैषी प्रागुक्तरीत्या तादृशीं व्याकरणशास्त्रस्यातिजीर्णामवस्थामसहमानः "यद्दिस्मृतमदृष्टं वा सूत्रकारेण तत्स्फुटम् । वाक्यकारो ब्रवीत्येव तेनादृष्टं च भाष्यकृद्" इत्युक्तलक्षणलक्षितं महाभाष्यं चकार । तथान्यावपि ग्रन्थावनेन रचिताविति अग्रे वक्ष्यते इति **केचित्** । तदा तत्पिपठिषुभिस्सहस्राधिकैः शिष्यैः प्रणिपत्य प्राञ्जलिभिरभ्यर्थितेन पतञ्जलिना मया यवनिकाभ्यन्तरस्थेन यूयं महाभाष्यमध्यापयितव्याः । तदा यवनिकाभ्यन्तरस्थोहं केनापि कदापि न द्रष्टव्यः । यदि यः कोपि पश्यति स ममाप्रियो भवतीति समयोभ्यधायि । अथ तेऽस्य समयमतिसुकरमित्यङ्गीकृत्य तिरस्करिणीं बद्ध्वा तदन्तरे उपविष्टात्सहस्रफणामणिमण्डितादादिशेषात्तस्माद्बहिरुपविष्टैरिशष्यैरुक्तकालेषु क्रमेण द्वात्रिंशदिनान्यथ वा द्वात्रिंशदाह्निकान्यधिजगिरे । स्वीयदौर्भाग्यात्त्रयस्त्रिंशत्तमे दिवसे त्रयस्त्रिंशत्तमाह्निकान्तस्थस्य "वासरूपोस्त्रियाम्" (३–१–९४) इति सूत्रादव्यवहितस्य "कृदतिङ्" इति सूत्रस्याध्ययनदिवसे वा "कृदतिङ्" इत्येतत्सूत्रमहाभाष्यमधीत्यान्ते कथमेतावत्सु सहस्राधिकसङ्ख्येष्वस्मासु प्रतिपुरुषमयं बहुभिराननैः युगपत्पाठयति । कति वा मुखान्यस्य सन्ति । तदिदमत्याश्चर्यवद्रूपं द्रष्टव्यमेवेति निश्चित्य तिरस्करणीमपनिन्युः प्रदेशान्तरम् । तामपनीय यावद्वितताफणासहस्रमण्डलमण्डितमुग्रदंष्ट्रं द्रष्टुमयतंत ते, तावदेवात्युग्रविषज्वालया भस्मीबभूवुः । पतञ्जलिरपि धृतजटिलमनुष्यमूर्तिः कथमेतदिति यावदचिन्तयत्तावद्बाह्यप्रदेशादागच्छन्तं कञ्चन शिष्यं ददर्श । सोपि शिष्यः दृष्ट्वा तांस्तादृशान्सब्रह्मचारिणो भीत्या साष्टाङ्गं प्रणम्यप्रणम्य यावन्मया जलोत्सर्जनाय गतं तावदेतैरपराद्धं तत्फलं चानुभूतम् । तदिदं तेषां दौर्भाग्यम् । तस्मान्नाहमपराधी तथापि क्षन्तव्योहं प्रसीद मय्यमिति बहुधा प्रार्थयामास । श्रुत्वा च तदभिहितं पतञ्जलिः पाठारम्भे शान्तिपाठमकृथाः । अन्ते तु शान्तिपाठमकुर्वाण एव यतो बहिर्गतस्ततस्त्वं राक्षसस्त्या इति तस्मै शशाप । तेनैवमतिप्रबलशापशतेन स फणिपतिर्बहुधा स्तुतिभिः स्तूयमानः प्रसन्नो भूत्वा शापेनानेन विषादं मा भजतु । यत्र त्वयोष्यते तत्र यः कोप्यागच्छेत् स सर्वोपि पचेर्निष्ठायां किं रूपमिति त्वया प्रष्टव्यः । यः पक्वमिति प्रत्युत्तरयति तेन त्वया मदीयमहाभाष्यकृतिरध्याप्या । एवं तदध्यापनेन त्वं शापान्मुच्यसे । किं च मदनुग्रहान्मदीयं महाभाष्यं सर्वं ते स्फुरत्विति शापमुक्तिकालसूचनवरप्रदानाभ्यां पतञ्जलिस्तं प्रसाद्यान्तरधात् ।

ततः फणिपतिना योगशास्त्रे सूत्रात्मकः पादचतुष्टयैः वैद्यशास्त्रे वार्तिकात्मकः ग्रन्थश्चेत्युभयमपि कृतम् । वैद्यशास्त्रे चरकग्रन्थोनेन रचित इति तु लोकप्रवादः इति **केचित्** । एवं–लोकानां मनोवाक्कायदोषनिरासाय ग्रन्थत्रयं कृत्वा महाभाष्यं विनान्यौ स्वयमेवाध्यापनेन प्रचारयामास । तदेतदुक्तं कैयटेन महाभाष्यव्याख्याने प्रदीपे मङ्गलश्लोके "योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि" इति॥

ततः गोनर्ददेशं (गोनर्दतीरं) प्राप्य गोणिकां स्वजननीं नमस्कृत्य किञ्चित्कालाभ्यन्तरे तस्यां सुरलोकपथमवतीर्णायां ततोभितष्ठौ ।

अथ पतञ्जलिशिष्यो ब्रह्मराक्षसोपि ततो निर्गत्य मार्गे वटमेकमारुह्य गुरूपदिष्टरीत्या पच्चैः के किं रूपमिति पथिकान्पृच्छन्पक्वमिति प्रतिवदतस्सर्वानप्यभक्षयत् । एवं बहुतिथे काले व्यतिक्रान्तेऽन्यं कञ्चन पथिकमागतं दृष्ट्वा यथापूर्वमपृच्छत् । स चैनं राक्षसं पक्वमिति प्रत्युत्तरेणाभ्यनन्दयत् । सोपि राक्षसस्शापमोक्षकालं सन्निहितं मन्वानस्तस्माद्वृक्षादवतीर्य—कस्त्वं, कस्मादागतः, किमागमनप्रयोजनम् । अधीतपाणिनिव्याकरणशास्त्र इव दृश्यसे । महाभाष्यं त्वामध्यापये यदीच्छसि, तद्वदेति पप्रच्छ । सोपि—अहं चन्द्रगुप्तो नाम द्विजः । उज्जयिन्यास्त्वत्तो महाभाष्यमध्येतुमेवाऽऽगममिति प्रत्यवोचत् । ततो ब्रह्मराक्षसो मासद्वयमनश्नन्संविशञ्छुचिर्भूत्वा सपूर्णं महाभाष्यं तमध्यापयति स्म । चन्द्रगुप्तोपि ततोधीतं सर्वमपि तन्महाभाष्यं कोमलवटपत्रेषु नखाग्रेण यथावद्व्यलिखत् । तदा सोपि विकृतं स्वराक्षसरूपमपहाय दिव्यरूपमासाद्य भुव्येतद्ग्रन्थप्रचारं कुर्विति तमाज्ञाप्य दिवमगमत् । स शिष्योपि वस्त्रेण बद्धं वटदललिखितं तत्पुस्तकं गृहीत्वोज्जयिनीं प्रतस्थे । पथि गच्छन्वनवर्त्मनातपोष्मणा तृषया चातीव श्रान्तः कस्मिंश्चित्सरित्तटे वृक्षमूले पुस्तकभारमवतीर्य नित्यकर्माणि निर्वर्त्य जलं निपीय तं पुस्तकभारमेवोपधानीकृत्य निद्रौ । तत्र यावत्कश्चिद्वत्स आगत्य जिघ्रसिषया तत्पुस्तकवटपत्राणि कानिचिन्मुखेन चकर्ष, तावदयं प्रबुध्य हाहाकारपुरस्सरं तन्मुखात्तानि यथालाभमाचकर्ष । अजोघ्रसीदिति तु कश्चित्प्रसिद्धिः । ततस्सिन्वुतटे प्रतिष्ठितं तद्वक्षणेन खिन्नं बुभुक्षितं तं तुरीयवर्णा कुमारी काचिद्वीक्ष्य दण्डवद्भूमौ प्रणम्येदं नवनीतं भक्षय श्रान्तोसीत्युक्त्वा स्वहस्तधृतं नवनवनीतभाजनं तस्मै समर्प्य सविनयं साञ्जलिबन्धं जगाद । हे ३ महानुभाव विद्वन्मुकुटमणे तपःप्रसन्न व्यतीतेषु दिवसेष्वत्र तदातदा समागतास्तपोधना मया यथाशक्ति यथामति फलपर्णाम्बुदानाद्युपचारैरुपचरिताः प्रसन्नमनसः हे ३ कुमारि कश्चिद्युवा पतञ्जलिशिष्याद्ब्रह्मराक्षसादधीतनिखिलमहाभाष्यो लोकेषु स्वीयमहाभाष्यप्रचाराय गृहीतद्विजशरीरोपरः पतञ्जलिरिवागच्छति । तं युवानं प्रणम्य पूजयस्वार्घ्यपाद्याद्युपचारैः । ततस्स प्रसन्नस्त्वां परिणेष्यतीति मां प्रसादयांचक्रुः । ततस्तमेव ध्यायन्ती तदागमनमेव सदा प्रतीक्षमाणा त्वाममिततेजसं तमेवागतं मन्ये इत्युक्त्वा विरराम ततस्स समाधिदृष्ट्या सर्वं तद्विज्ञाय प्रसन्नस्तात्कालिकं नित्यं कर्म निर्वर्त्य तन्नवनीतमुपभुज्य तदिङ्गितज्ञो वर्णक्रमेण तिस्रो भार्या उदूह्य त्वामुद्यच्छेयमित्यवदत् । ततस्स तद्गृहं गत्वा स्वयमेव तन्मात्रा दत्तया तया सह स्वपुरीमुज्जयिनीं गत्वा वर्णक्रमेणानया सह चतस्रो भार्या उदूह्य गृहस्थधर्मे स्थितो वटपत्रलिखिते महाभाष्यपुस्तके वत्स (अज) भक्षितेन वियोजितान् ग्रन्थान्पर्यालोच्य गुरूपदिष्टमर्थं स्मृत्वास्मृत्वा च प्रायः यथामति समीचकार । यत्र त्वपाटवमासीत्तत्र ग्रन्थपातसूचिकां कुण्डलनां (०) समकल्पयच्च । तदुक्तं महाराजाधिराजेन श्रीहर्षेण महाकविना नैषधकाव्ये—"फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता" (सर्गे २ श्लो. ९५) इति कुण्डलनां विलिख्य तदभ्यन्तरेऽजभक्ष इति

व्यलिखदिति केचित् । एवं स तद्यथाबुद्धिबलं समीक्ष्य नियमेन तन्महाभाष्यस्य पाठप्रवचनाभ्यां तिसृभिर्द्विजदारैर्यज्ञान्निर्वर्तयन्कालं यापयामास । ततः कदाचिद्वसन्तसमये चतस्रोपि भार्या रममाणस्यास्य गर्भमादधुः । ततस्स यथाकालं यथायोग्यं पुंसवनादीनि कर्माणि निर्वर्तयांचकार । ततस्ता उचितेषु समयेषु चतस्रोपि दीप्ततेजसः एकैकक्रमेण चतुरः पुत्रानसोषत । यथाकालं स द्विजवरस्ताञ्जातकर्मणा संस्कृत्य वर्णक्रमेण वररुचिर्विक्रमार्को भट्टिर्मेतृहरिरिरिति नामभिराहूयोपनीय त्रीन्त्साङ्गोपाङ्गांश्चतुरो वेदानध्याप्य महाभाष्यमध्यजीगपत् ।

ततो भर्तृहरिस्तुरीयासूनुर्महाभाष्यं पिपठिषुस्तच्छिष्यैः स्वभ्रातृभिरनधिकारीति निवारितो रहः पितुरन्तिकमुपेत्य प्रणिपत्य सविनयं भुवोंतरे किंचित्कुहरमकुतोभयं विरचय्य तत्र भवता महाभाष्यमध्येष्यमाणो कैरप्यविज्ञातः पूर्णमनोरथस्स्यामिति स्वाशयं प्रकाशयांचकार । ततश्चन्द्रगुप्तद्विजोपि स्वतुरीयभार्यासुतगिरममृतोपममाकर्ण्य तुरीयासुतस्य वेदवेदाङ्गाध्ययनाध्यापनयोर्नैमित्तविशेषमन्तरा नाधिकारो भवितेति तमादिदेश । सोपि तदर्थं वैराग्यमङ्गीकृत्य तथाभूतं तं महाभाष्यमध्याप्य तेषां पुत्राणां विवाहमपि कारयामास । ततस्स चन्द्रगुप्तो विरक्तो भूत्वा ततो निर्गत्य शुकशिष्यस्य गौडपादाचार्यस्यानुग्रहेण तुरीयं महनीयं पारमहंस्यमाश्रममङ्गीकृत्य गङ्गातीरेण काशीक्षेत्रे प्राप्य तत्र कांश्चिदनेहसो नीत्वा गङ्गाविश्वेशौ सेवमानोन्यैः सह योगिवरिष्ठैर्बदरिकाश्रमं प्राप्य चिरमद्वैतामृतमहाम्बुधिक्रीडाविहरणविस्मृतसर्वलोकचरितः श्रीगोविन्दभगवत्पादनाम्ना प्रतीतोधितष्ठौ ।

अथ पितरि तुरीयमाश्रममाश्रित्य गतवत्यपि वेदशास्त्राभ्यासजन्यविवेकवत्तया, कालकर्मस्वभावज्ञतया, तद्विरहदुःखं सेहे तत्पुत्रैः । ततः प्रथमो वररुचिर्गणितेष्वेव बहून् ग्रन्थानकार्षीत् । अनेनायं न पूर्वोक्तकात्यायनापरपर्यायो वररुचिरिति ज्ञायते । तेन तु कल्पसूत्राणि, गृह्यकारिकाः, स वार्तिकग्रन्थः, वाक्यकरणाख्यो यो वाक्यपञ्चाङ्गनाम्ना मद्रास्राज्ये प्रसिद्धस्य पञ्चाङ्गस्य मूलभूतः तथान्येपि कथासरित्सागरादयो बहवो ग्रन्थाः कृता इति प्रागुक्तं न विस्मर्तव्यम् । द्वितीयो विक्रमार्कः नाट्यविद्याविशारदः इन्द्रेण कदाचिन्नाट्यविवादे निर्णेतृपदमधिष्ठितस्तत एवैकमुपलभ्य मणिखचितमासनम् (सिंहासनम्) अध्यास्य (तदीयाशिषोपायान्तरेण च **षण्मासोत्तरैकाधिकद्विसहस्राब्दान्**) तृतीयेनानुजेन स्वसाचिव्यपदमधितिष्ठता भट्टिना सह राज्यं परिपालयामास । अथ राज्यकार्याद्विश्रम्यारण्ये (षण्मासाधिकद्विसहस्राब्द) कालं यापयित्वा दिवं जगाम । यदा राज्यकोशादिषु विरक्तोयमरण्याश्रममविक्षत्तदा भट्टिस्तदनुजस्तदग्रजविक्रमादित्यराजनाम्ना राज्यं परिपालयामास । यदा भट्टिस्त्वाग्रजराज्यपरिरक्षणोन्मुखस्तदा भर्तृहरिः स्वतृतीयाग्रजनाम्ना सुशोभितं व्याकरणशास्त्रलक्षणलक्षितसुपदगुम्फैरलंकृतं भट्टिकाव्यं नाम ग्रन्थमाततान श्रीमद्दाशरथिचरितसुमनोहरम् ।

तथा स एव शतकत्रयाख्यं (नीतिशतकं, शृङ्गारशतकं, वैराग्यशतकं चेति) ग्रन्थमकरोत् । योयमिदानीं भर्तृहरिशतकत्रयनाम्ना जागर्ति ॥

यदा कालवशेन प्रातैर्विघ्नविशेषैरध्ययनाध्यापनादिप्रचारः समूलमुन्मूलितो दाक्षिणात्येष्वेक कचित्पुस्तकमात्र एव पाणिनिव्याकरणकात्यायनवार्तिकमहाभाष्यादिग्रन्था विशश्रमुश्च । किं च चित्रकूटमधिवसता केनचिन्नारायणनाम्ना विदुषा तन्महाभाष्यं ततो विलिख्य रक्षितमासीत् । तदा कश्चित् (ब्रह्मराक्षसः) तन्महाभाष्यपुस्तकमानीय वसुरातादिभ्यो ददौ । यैर्विक्रमादित्य-ज्येष्ठभ्रातरं भर्तृहरिमन्यांश्च बहूनि शास्त्राण्यध्यापयद्भिर्जीर्णं तच्छास्त्रमुद्धृतम्—भूदिति **केचित्** ।

ततो भर्तृहरिः स्वपितृचन्द्रगुप्तद्विजलिखितवत्स (अज) भक्षितावशिष्टवटपत्रस्थमहाभाष्य-ग्रन्थे पौर्वापर्यपर्यालोचनया वत्स (अज) भक्षितग्रन्थांशमवगत्य पत्रान्तरेषु तान्विलिख्य समीकृत्य जीर्णं तन्महाभाष्यं समुद्धृत्य सपादलक्षकारिकाभिर्महाभाष्यकारतात्पर्यार्थविबोधकं ब्रह्मवाक्यपदभेदेन काण्डत्रयात्मकं वाक्यपदीयाभिधं महाभाष्यव्याख्यानं चकार । यद्भोजराज-पुञ्जराजपण्डितकृतटीकाभ्यां संशोभते स्म । काश्यामिदानीं मुद्रितं तदिति तु भ्रमः । लघुत्वात् ।

ततो भर्तृहरिर्वाक्यपदीयमेवं संग्रथ्य " अहो भाष्यमहो भाष्यमहो वयमहो वयम् । मामदृष्ट्वा गतस्स्वर्गमकृतार्थः पतञ्जलिः " इति गुर्वधिक्षेपकगर्वदुर्भरेण स्वीयदुर्भाषणदुष्परिपाकेन स्वीयमेनं महानिबन्धमप्रतिष्ठापदमारोहयामास । एतदीयगुर्वधिक्षेपकदुरुक्तिमसहमानैस्तात्कालि-कैर्विद्वद्भिरयं ग्रन्थोध्ययनाध्यापनपथमनापादित इति यावत् । अत एवेदानीं प्रायः स ग्रन्थो दौर्लभ्यपदवीमवापेत्यस्मदीयं दौर्भा (सौभा) ग्यम् । एवमेतैश्चतुर्भिश्चन्द्रगुप्तद्विजपुत्रैरुज्जयिन्यां कलियुगं कृतयुगायितमिति वदन्ति ।

(अत्र केचित्)—विक्रमार्कसमयात् ८४९ पञ्चचत्वारिंशदुत्तराष्टशतीमितेषु, अथ वा कलेः ३८८८ एष्टाशीत्युत्तराष्टशत्यधिकत्रिसहस्रेषु,—वर्षेषु व्यतीतेषु तदुत्तरे विभववर्षे वैशाखमासे शुक्लपक्षे दशम्यां केरलदेशे कलापीग्रामे शिवगुरुशर्मणो भार्यायां सतीनाम्न्यां श्रीशङ्कराचार्यः पुत्र उदियाय । तदाहुर्वृद्धाः—"विधिनागेशवह्नयब्दे ३८८८ विभवे मासि माधवे । शुक्लपक्षे दशम्यां तु शङ्करार्योदयस्स्मृतः" इति । कलेरिति शेषः । तथैव लोक-प्रवादादित्याहुः । **अन्ये** शङ्करमन्दारसौरभे नीलकण्ठभट्टास्तु— "प्रासूत तिष्यशरदामतियाऽवत्यामेकादशाधिकशतोनचतुस्सहस्र्याम् ३९११ " इति । **तिष्यशरदां** कलिवर्षाणामित्यर्थ **इत्याहुः** । **अपरे तु** विक्रमार्कसमयात्परस्मिन् ११९० सार्द्धशताधिकसहस्रतमे वर्षे गुर्जरनृपो जयसिंहनामासीत् । तदानीं श्रीपत्तनवासिनो देवसूरिनाम्नो जैनाचार्यस्य शिष्यो माणिक्याभिधः पण्डितो बभूवेति मेरुतुङ्गाचार्यकृतप्रबन्धचिन्तामणिग्रन्थतो ज्ञायते । स माणिक्यपण्डितः स्वकृतकाव्यप्रकाशटीकायां सङ्केताभिधायां द्वितीयोल्लासे कुमारिलभट्टाचार्यमतं स्वोक्तार्थे प्रमाणयाञ्चकार । कुमारिलभट्टाचार्यशङ्करार्ययोः प्रयागक्षेत्रे समागमः समजनीति शङ्करदिग्विजये स्पष्टम् । तस्माच्छ्रीशङ्कराचार्यदेशिकचरणानामपि स एव समय **इत्याहुः** ॥ आङ्गलदेशीयाङ्गलपण्डितास्तु आङ्गलाष्टमशके (सन् ८००) तेषां स्थितिं न्यरूपयन् । आङ्गलविद्यानिपुणास्तैलिङ्गोपपदा मोहमय्यां प्राड्विवाकपदमधिष्ठिताः काशीनाथपन्तास्तु आङ्गले षष्ठे शके (सन् ६००) श्रीशङ्कराचार्याणां स्थितिं वर्णयांचक्रुः मुद्राराक्षसनाटक-

प्रस्तावनायाम् । यदा श्रीशङ्कराचार्यः उपनयनोत्तरं जन्मतोऽष्टमे सप्तमे वा वयसि कदाचित्स्नातुं पूर्णानदीमवतीर्य नक्रगृहीतपादोऽभूत्, तदा स्वस्य जन्मान्तरप्राप्तिसमयमुपस्थितं मन्वानः संन्यासपरिग्रहं जन्मान्तरं निश्चित्य तत्र जले स्थितस्सन्नेव तत्र स्थितायै स्वमात्रे संन्यासेनैव स्वस्य ग्राहविनिर्मोकं विनिवेद्य तदनुमत्या संन्यासं परिगृह्य ग्राहग्रहान्मुक्तः । उपर्यागत्य तत्रातीव खिन्नां तां प्रणम्य सम्मान्य तदनुज्ञामवाप्य च गुर्वनुग्रहं कामयमानः तदातिप्रसिद्धतरं श्रीगोविन्दभगवत्पादमेव योग्यं देशिकं मत्वा तदर्शनाय बदरिकाश्रमं प्रतस्थे ॥

प्रस्थाय च क्रमेण बहून्देशानतिलङ्घ्यास्तमयं गतवति भगवति भास्वति वाराणसीं प्रविवेश । तत्र रात्र्यां विश्वेशमद्वितीयं ब्रह्म ध्यायन्विचित्रैर्बहुभिः स्तवैः तुष्टाव । तेन प्रसन्नो भगवांस्तस्मै ब्रह्मसूत्रभाष्यनिर्माणशक्तिं वरमादिदेश । एवं वरमुपलभ्य प्रातरेव ततो निर्गत्यास्ताचलं प्रविशति निशापतावुदयाचलमधिरूढे च चित्रभानावादित्ये तत्र हिरण्मयं पुरुषमभिध्यायन्पथिकैः सह गच्छंस्तत्रतत्र पथि यथाकालं फलादीन्यभ्यवहरन्पयांसि पिबन्नुपविशन्नुत्तिष्ठंश्च क्रमेण बदरिकाश्रममाससाद । यत्र प्रादेशमात्रविवरद्वारां तत्रत्यैः महर्षिभिः कथितां श्रीगोविन्दभगवत्पाददेशिकवरिष्ठस्यावासस्थानगुहामतिकौतूहलेन ददर्श । ततस्तां त्रिःप्रदक्षिणीकृत्य द्वारमागत्य प्रणिपत्य देशिकवरिष्ठमनन्यसाधारणैरप्राकृतैस्स्तवैस्तुष्टाव । ततस्तेन समाधेरुपरम्य कस्त्वमिति पृष्टः "स्वामिन्नहं न पृथिवी न जलं न तेजो न स्पर्शनो न गगनं न च तद्गुणा वा । नापीन्द्रियाण्यपि तु विद्धि ततो विशिष्टो यः केवलोऽस्ति परमः स शिवोऽहमस्मि" इति स्वीयं परमाद्वैतस्वरूपं विज्ञापयामास ॥

तदिदमाकर्ण्य ज्ञात्वा च तदवतारकारणादिकं परमानन्दतुन्दिलः स त्वां समाधिनावतीर्णं शङ्करं जानामीत्युक्त्वा स्वचरणाम्बुजे प्रदर्श्य तेन पूजितो गुरुरौपनिषदं तत्त्वमस्मै आचार इत्युपदिदेश । ततः श्रीशङ्कराचार्यदेशिकवरिष्ठः श्रीगोविन्दभगवत्पाददेशिकवरिष्ठं चिरायोपचरंस्तत्रैव तस्थौ । ततः कस्मिंश्चित्समये श्रीगोविन्दभगवत्पाददेशिकवर्यो विदेहमुक्त्या निजमहिमाभेदमुपजगाम । ततः श्रीशङ्कराचार्यदेशिकवर्योऽद्वैतब्रह्मसूत्रभाष्यं विरचय्य ततः प्रस्थाय तत्रतत्र प्रतिद्वन्द्विनः पाषण्डादीन्वादैर्विजित्य तन्मार्गप्राबल्येन नष्टप्रायान्वैदिकमार्गान् षण्मतानि च यथाबदतिप्रयासेन संस्थाप्य सर्वत्र सर्वैर्जगद्गुर्वादिविरुदावलिभिस्तूयमानो काञ्चीपुरीमधिवसति स्म । अनेनाचार्यवर्येण स्वकृते "मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वाद्" (३–२–३) इति ब्रह्मसूत्रभाष्ये– " कालविसंवादोपि च स्वप्ने भवति– रजन्यां सुप्तो वासरं भारते वर्षे मन्यते " इत्युक्तम् । " अत्र रात्रिसमयेपि केतुमालादिवर्षान्तरे वासरो भवति " इत्येतद्भाष्यव्याख्यायां रत्नप्रभायां श्रीगोविन्दानन्दैरुक्तम् । एवं चाचार्याणाममरिकादिदेशान्तरादिज्ञानमासीदित्यनुमीयते इत्यन्यदेतत् ।

ततस्तदातदा स बहून्महतो लघूंश्च निबन्धानिबबन्ध । एवमाचार्यः पीठाधिपोपि भूत्वा जन्मत आयुषा द्वात्रिंशत्तमे वयसि विदेहमुक्तोभूदित्यलं पल्लवितेन ।

तेऽपि वररुच्यादयश्चत्वारो भ्रातरः स्वगुरुश्रीगोविन्दभगवत्पाददेशिकानां सिद्धिमाकर्ण्य तदा स्वकर्तव्यं सर्वं कर्म निर्वर्त्य विद्याकीर्तिविनयादिभिः सम्पन्ना उज्जयिन्यां विरेजिरे इत्याहुः ॥

परे त्विदमुत्सन्नं महाभाष्यं श्रीमच्छङ्कराचार्यदेशिकभगवत्पादाः पातालं प्रविश्य तत्रादिशेषमुखात्तन्महाभाष्यमधीत्य भूमण्डलमागत्य भर्तृहर्यादिभ्यः **सयोगशास्त्रं** महाभाष्यमुपदिदेश । तदुक्तं शङ्करविजये– "उरगपतिमुखादधीत्य साक्षात्स्वयमवनेर्विवरं प्रविश्य येन । प्रकटितमचलातले सयोगं जगदुपकारपरेण शब्दभाष्यम् " इति । किं चायं भर्तृहरिर्न शूद्रापुत्र इत्यनेन ज्ञायत **इत्याहुः** ॥ **केचित्त्वयं** पतञ्जलिर्योगसूत्रकृतोन्य एव । यत एकस्मिन्नेव विषये "एतेन योगः प्रयुक्तः" (व्या. सू. । २ । १ । ३) इति दूषणं, पुनस्तत्रैव विषये तदानुकूल्येन भाष्यकरणं च सर्वज्ञस्य व्यासस्य न युज्यते ॥ किं च योगभाष्यकारो व्यासः पतञ्जलितोर्वाचीनः । "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः " इति ब्रह्मसूत्राणां चतुरध्याय्यात्मकानां व्यासकृतानां भिक्षुसूत्रपदेन व्यपदेशात् । पाणिनिना " वासुदेवार्जुनाभ्यां–" "एजेः खश्" "नेखमुखात्संज्ञायाम् " "शरद्वच्छुनः–" "कलापिवैशम्पायनान्तेवासिभ्यश्च" "कलापिनोण्" इत्यादिसूत्रेषु पाणिनितोपि प्राचीनानां भारतरामायणादावुक्तानां नाम्नां साक्षात्कचिद्गणेषु वानुवादेन पाणिनेः व्यासतत्कृतमहाभारताद्यपेक्षयोत्तरकालिकत्वस्य निर्णेतुं शक्यत्वात् । अन्यच्च पाणिन्यपेक्षया पूर्वकालिकेन व्यासेन योगभाष्यकरणात्तदानीं पतञ्जलिसत्त्वे प्रमाणाभावाद्राजसूयेत्यत्र चन्द्रगुप्तसभेत्युदाहरणेन पतञ्जलेर्महाभाष्यकारस्य चन्द्रगुप्तोत्तरकालिकत्वमिति तदा व्यासतत्त्वे मानाभावात्पतञ्जलिभेद एव युक्त इति **दिगित्याहुः** ।

अन्ये तु "योगेन चित्तस्य पदेन वाचां मलं शरीरस्यच वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि" इति पतंजलेर्महाभाष्ययोगसूत्रचरक (वैद्यवार्तिक) ग्रन्थकर्तृकत्वस्य कैयटेन महाभाष्यव्याख्यानप्रदीपारम्भे मङ्गलश्लोके उल्लेखादुभयोरेक एव कर्तेति प्रतीयते । **न च** क्वचिन्मुद्रितपुस्तकेष्वयं श्लोकस्तत्र ग्रन्थे नोपलभ्यत इति तत्त्रितयकर्तृकत्वं निर्मूलमिति **वाच्यम्** । दाक्षिणात्यपुस्तकेषु सर्वत्र काशीस्थेष्वपि केषुचित्पुस्तकेषु लिखितेषु तदुपलम्भात्साहसेन तदपलापस्य कर्तुमशक्यत्वात् । किं च पतञ्जलिचरिते तथैवोक्तम् । योगसूत्रभाष्यकर्त्ता व्यासोन्यः, ब्रह्मसूत्रकर्त्ता व्यासोन्यः, पुराणभारतादिकर्त्ता व्यासोन्यः, इति व्यासभेदाङ्गीकारस्यैव युक्तत्वाच्च । अत एव स्वस्य ब्रह्मसूत्रयोगसूत्रभाष्यकर्तृत्वमष्टादशपुराणभारतकर्तृत्वेनोट्टङ्कनमिव कुत्रापि पुराणेषु नोट्टङ्कितम् । **न च** भागवते " जन्माद्यस्य यतः " इत्युल्लेखोस्तीति **वाच्यम्** । अन्यकृतस्यानुवादमात्रेणापि तदुपपत्तेः । अतीता व्यासास्त्वष्टाविंशतिरिति चतुर्दशेति च पुराणेषु बहुशूल्लेखाच्च । पुराणभेदेन व्यासपदाधिकृतानां परस्परं वैजात्येन क्वचित्साजात्येन च भेदोक्तिरष्टाविंशत्यपेक्षयाऽऽधिक्यमिति त्वन्यदेतत् । **न च** विभीषण द्रोण वासुदेवार्जुनादिशब्दप्रयोगाद्भारतोत्तरकालिकत्वं पाणिनेरिति तोप्यर्वाचीनत्वं पतञ्जलेरिति **वाच्यम्** । " जातस्य पुत्रस्य दशमेहनि पिता नाम कुर्याद्घोषवदाद्यन्तरन्तस्थं त्रिपुरुषानुकम् " इति कल्पसूत्रकारोक्तेस्तत्तत्कुलेषु त्रिपुरुषानुवचनस्यैव नाम्नः कर्त्तव्यतोक्त्या तत्तत्पूर्वद्रोणाद्यभिप्रायेणापि तदुपपत्तेः । **एतेन** "माणवेचरेकाभ्यां खञ्" इत्युक्तेश्वरकस्य पाणिनिपूर्वकालिकत्वेन पतञ्जलिकर्तृकत्वे प्रमाणाभाव **इत्यपास्तम्** । सूत्रे चरकशब्दस्य ग्रन्थवाचकत्वे प्रमाणाभावाच्च । **न च** वासुदेवार्जुनाभ्यामित्यादौ वासुदेवशब्दस्यार्जुनशब्दस्य च वसुदेवापत्यादिभिन्नवाचकस्यापि

ग्रहणान्न दोष इति **वाच्यम्** । " वासुदेवार्जुनाभ्याम् " " पाण्डोर्ड्यण् " " गविषुधिभ्यां स्थिरः " इत्यादौ रामलक्ष्मणावित्यत्रेव साहचर्येण पार्थ एवार्जुनस्तत्सारथिरेव वासुदेव इत्यादिरीत्या पाण्डवोत्तरकालिकत्वं पाणिनेस्सिध्यतीत्यर्थस्य वक्तुं शक्यत्वात् । अत एव " विपराभ्यां जेः " इत्यत्र पक्षित्राचकविशब्दस्य परा सेना जयतीत्यादिप्रयोगस्थश्रेष्ठार्थकपराशब्दस्य च न ग्रहणम् । किं तूपसर्गेषु दृष्टसाहचर्ययोरेवोपसर्गयोर्ग्रहणमित्यादि तत्रतत्रोक्तं संगच्छते । किं च त्वदुक्तरीत्या पाणिनिसमये वासुदेवार्जुनयोरभावेन तत्साहचर्यं वक्तुमशक्यमेव । नाम्नो नियामकस्य कल्पसूत्रस्य पाणिन्युत्तरकालिकत्वाच्च । यतः सूत्रेषु पाणिनिसंकेतितकृत्तद्धितघोषान्तस्थादिशब्दा दृश्यन्ते । न च लौकिकेषु वैदिकेषु सर्वेषु तदङ्गोपाङ्गादिषु च प्रयोगेषु विद्यमानानां सिद्धानां शब्दानामिदमन्वाख्यानमिति महाभाष्योक्तरीत्या व्याकरणेनानुशासनात्पाणिनेस्तदुत्तरकालित्वमिति **वाच्यम्** । "कतन्तेभ्यः" " धिन्विकृण्व्योरच " इत्यादौ पररूपकरणादचेत्युक्तेश्च पाणिनेः कात्यायनपतञ्जलिकालोत्तरकालिकत्वापत्तेः । कृतकरिष्यमाणयावद्ग्रन्थोत्तरकालिकत्वस्याप्यापत्तेश्च । तस्मात्पाश्चिमात्यपण्डितवर्येण (म्याक्सिमोलर) इत्यनेनाङ्गलशकारम्भात्प्राग् (८००) अष्टशततमस्य वर्षस्य तच्छकारम्भात्प्राक् (६००) षट्शततमवर्षस्य चाभ्यन्तरकालेषु कल्पसूत्राणामुत्पत्तिः । एवं च कल्पसूत्राणामिदानीन्तनाङ्गलैकोनविंशतिशतकान्तिमवर्षात्पूर्वमितः पञ्चशतोत्तरद्विसहस्रवर्षाणामितः सप्तशत्युत्तरद्विसहस्रवर्षाणाञ्चाभ्यन्तरे काले प्रणीतत्वात्पाणिनेः प्रागुक्तरीत्या नन्दराजराज्यकालिकोपवर्षपण्डितशिष्यत्वेन निरूपणात्कलेः सप्तत्युत्तरषट्शताधिकसहस्रवर्षोत्तरं शतवर्षेषु नन्दानां राज्यकाल इत्यर्थस्य च वक्ष्यमाणत्वात्स एव कल्पसूत्रप्राक्कालिकस्समयः पाणिनेरित्येव युक्तम् । " वासुदेवार्जुनाभ्याम्— " इत्यादायतिप्रसङ्ग्यावृत्तिस्तु तत्तद्देशकालेषु येये यथायथा प्रसिद्धास्ते एव तत्तच्छब्देन ग्राह्याः नान्य इत्यभिप्रायेण महाभाष्यकृता " गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः " इति न्यायः स्वीकृत **इत्याहुः** ।

एवं भर्तृहरिविषयेपि किंचिद्विचारयामः ।

यत्तु विक्रमादित्यः चन्द्रगुप्तद्विजपुत्रो राज्यमवापेति **तदयुक्तम्** । (**कुतः**) । चन्द्रगुप्तस्य महाभाष्याध्ययनाय गमनसमये राज्यमासीन्न वा । (**आद्ये**) राज्ञोस्य बहुभृत्यस्य भाष्याध्ययनोत्तरमागमनसमये स्वशिरसि पुस्तकभारवहनं मार्गे आहाराद्यभावेन श्रमः, शूद्रासकाशान्नवनवनीतस्य ग्रहणं, निद्रया सुप्तस्य वत्सैः (अजैः) पुस्तकभक्षणं चेत्यादिकं हास्यास्पदमेव स्यात् । (**अन्त्ये**) तस्य राज्याभावेन पुत्रेण विक्रमादित्येनापि राज्यं कुतोपि न कथमप्युपलब्धमिति तस्य राज्यपरिपालनवर्णनमयुक्तं स्यात् । केवलं सिंहासनमेवेन्द्रेण दत्तं, न तु राज्यमपि तस्मै दत्तमित्यस्य प्रसिद्धत्वाच्च । तस्मादयं विक्रमादित्यः शककर्त्ता प्रसिद्धः चन्द्रगुप्तपुत्र इति वर्णनं भ्रान्तानामेव । (अत्रेदं बोध्यम्) । अयं विक्रमादित्यः चन्द्रगुप्तद्विजपुत्रादन्य एव—**तथा हि**—गन्धर्वसेनस्य द्वे धर्मपत्न्यावास्ताम् । क्रमेण भर्तृहरिविक्रमादित्यनामानौ **पुत्रौ** तयोः गन्धर्वसेनो जनयामास । तत्र द्वितीयपत्नीपिता धारानगराधिपतिः स्वस्य सन्तत्यभावाद्दौहित्रौ भर्तृहरिविक्रमादित्यावेव स्वपुत्रौ मन्वानस्तौ बहुविद्यानिपुणौ कारयामास । ततो

विक्रमादित्यस्योक्तिमनुसृत्य साक्षाद्दौहित्राय विक्रमादित्याय देयमिति निश्चितमपि राज्यं भर्त्तृहरये धारापतिः प्रादात् । ततः तदमात्यपदमङ्गीचकार विक्रमादित्यः । ततः किंचित्कालानन्तरममात्योयं धारां विहायोज्जयिन्यां राज्यमाराय भ्रातरं भर्तृहरिं राजानं प्रबोध्य तत्र राज्यमकरोत् । तदभ्यन्तरे कदाचिद्राज्ञा स्त्रीकामुकेन भर्त्तृहरिणा विरोधमुपलभ्यामात्यपदं विहाय विन्ध्यस्योत्तरदिशि सञ्चरन् ढक्कानगरं प्राप्य तत्र स्वशौर्येण तद्राज्यं लब्ध्वा तत्परिपालयन्विक्रमनगराभिधया तदाह्वास्त । एवं च पितुश्चन्द्रगुप्तस्य राज्याभावः पुत्रस्य विक्रमादित्यस्य तु राज्यं युज्यत एवेति **केचित्** । (तत्रेदं वक्तव्यम्) । अस्तूक्तरीत्या पुत्रस्य राज्यम् । विक्रमादित्यभर्तृहरी न चन्द्रगुप्तद्विजपुत्रौ स्तः । किन्तु गन्धर्वसेनस्येत्युक्तमनुपदमेव । अयं गन्धर्वसेनः विप्रः क्षत्रियः वैश्यो वेति तु न प्रकृतमित्याहुः ।

अन्ये तु भर्तृहरिः वाक्यपदीयं शतकत्रयं च चकार । भट्टिकाव्यं तु भट्टिकविनाम्नैव कृतम् । भर्तृहरिकृतमिति व्याख्याकृदुक्तिः प्रमाणानुक्तेरश्रद्धेयैवेति, तथा श्रीधरस्वामिपुत्रो महावैयाकरणः भर्तृहरिपण्डितो नाम प्राचीनाद्भर्तृहरेर्भिन्नः कश्चिदर्वाचीनः आसीत् । ततो नामैक्यादेवं सर्वे भ्रान्ता इति, तथा भर्तृहरिपुत्रो भट्टिरिति, एवं भर्तृहरिर्भट्टिश्च भिन्नावेव न तयोः कोपि सम्बन्ध इति स्वस्वमतानुसारिण्य इदानीन्तनाङ्गलपण्डितोक्ताय आङ्गलिपुस्तकेपूपलभ्यन्ते **इत्याहुः** ॥

परे तु भर्तृहरिविक्रमादित्यौ भ्रातरौ । तयोराद्यश्चतुर्दशवर्षाणि राज्यं पर्यपालयत् । स्वनाम्ना शकं निरवर्तयच्च । ततो द्वितीयः कनिष्ठो भ्राता विक्रमादित्यो राज्यं शशासेति, तथा भर्तृहरिर्विक्रमादित्यस्य न भ्राता । यतः—स्वकृते वैराग्यशतके "उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो निस्तीर्णस्सरितां पतिर्नृपतयो यत्नेन सन्तोषिताः । मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः प्राप्तः काणवराटकोपि न मया तृष्णेऽधुना मुञ्च माम् ॥ ९४ ॥ भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला । भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्तृष्णे दुर्मतिपापकर्मनिरते नाद्यापि सन्तुष्यसि" ॥ ९५ ॥ इति स्वीयमहादरिद्रावस्था प्रदर्शितेति, **तथा** वाक्यपदीयकर्त्ता नायं, किन्तु केवलहरिनामा कश्चित्पण्डितः । भर्तृहरिरित्युल्लेखः क्वचिद्यो दृश्यते स भ्रान्त्या । केवलं हरिनाम्न उल्लेखाधिक्याच्च । शतकत्रयकर्ता तु भर्तृहरिरिति, तथा शतकत्रयं निर्मायान्यः पण्डित एतन्नाम निबबन्धेति स्वस्वमतानि प्रकाशयांचक्रुरित्याहुः ॥

अपरे तु वाक्यपदीयकर्ता भर्तृहरिराङ्गलशकस्य सप्तमे शतके (सन् ७००) बभूव । तथाङ्गलषष्ठशतकात् (६००) पूर्वमासीच्छतकत्रयकर्तापि । यतः पञ्चतन्त्रे एतच्छतकत्रयस्थपद्येष्वेकविंशतिपद्यान्युपलभ्यन्ते । पञ्चतन्त्रं चाङ्गलपञ्चमशकानन्तरं (सन् ५००) नोदभूत् । किन्तु ततः प्रागेवेत्यन्यत्र स्पष्टम् । तस्मादाङ्गलपञ्चमशके प्रायः (५०) पञ्चाशद्वर्षात्पूर्वमासीदिति ज्ञायते इति, तथा वाक्यपदीयकर्त्ता न विक्रमादित्यभ्राता । यतः चन्द्रगुप्ताचार्यस्तत्सहायिनश्च महाभाष्यव्याख्यानरूपमेतद्वाक्यपदीयग्रन्थं भर्तृहरिसकाशादुपलभ्याध्ययनाध्यापनाभ्यां प्रसिद्धमकुर्वन् । काश्यां मुद्रितं तु वाक्यपदीयसारभूतमेव स्यात् तत्कृतम् । तस्य लक्षग्रन्थात्मकत्वात् । अस्यात्यल्पत्वाच्चेत्युक्तम् । एतेषां राजतरङ्गिण्युक्तरी-

त्याङ्कलशाङ्कस्य पञ्चचत्वारिंशत्तमवर्षमारभ्य पञ्चषष्टितमवर्षमध्यकालिकाभिमन्युनाम्नो राज्ञ आश्रित-कोटिप्रविष्टत्वेन तात्कालिकत्वमित्याहुः ।

प्रकृतमनुसरामः—युधिष्ठिरनप्तुः परी (रि) क्षितो जन्मोत्तरं पञ्चदशोत्तरसहस्रवर्षेषु (१०१५) व्यतीतेषु शतं समाः (१००) नन्दा राज्यं पर्यपालयन् । तदुक्तं श्रीभागवते द्वादशस्कन्धे द्वितीयाध्याये "यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनम् । एतद्वर्षसहस्रं तु ज्ञेयं पञ्चदशोत्तरम्" इति । तथा तत्रैव "महानन्दिसुतो राजञ्छूद्रागर्भसमुद्भवः । महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् । तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखास्सुताः ॥ य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः" इति । विष्णुपुराणे चतुर्थांशे चतुर्विंशाध्याये तु ज्ञेयमित्यस्य स्थाने शतमिति व्यत्यासेन पाठोस्ति—"महानन्दिसुतश्शूद्रागर्भोद्भवोतिलुब्धो महानन्दः परशु-राम इवापरोऽखिलक्षत्रियान्तकारी भविता ॥ ४ ॥ तस्याप्यष्टौ सुताः सुमाल्याद्या भविता-रस्तस्य च महापद्मस्यानु पृथ्वीं भोक्ष्यन्ति ॥ ५ ॥ महापद्मस्तत्पुत्राश्चैकं शतमवनीपतयो भवन्ति । नवैतान्नन्दान्कौटिल्यो (विष्णुगुप्तस्तत्पुत्रो वा) ब्राह्मणस्समुद्धरिष्यति ॥ ६ ॥ तेषामभावे मौर्याश्च पृथ्वीं भोक्ष्यन्ति । कौटिल्य एव चन्द्रगुप्तं राज्येभिषेक्ष्यति" ॥ ७ ॥ इत्यारभ्य—"याव-त्परीक्षितो जन्म यावन्नन्दाभिषेचनम् । एतद्वर्षसहस्रं तु शत पञ्चदशोत्तरम्" ॥ ३२ ॥ इति ॥ "आरभ्य भवतो जन्म" इत्यपि श्रीभागवते पाठान्तरम् । एवं च परीक्षिज्जन्मारभ्य नन्दराज्या-रम्भान्ताः कालाः विष्णुपुराणरीत्या पञ्चदशोत्तरशताधिकसहस्रवर्षाणि (१११५) श्रीभाग-वतरीत्या तु पञ्चदशोत्तरसहस्रवर्षाणि (१०१५) भवन्ति ।

परीक्षितो जन्मकालश्च कलेः प्रथमशतके इति सिध्यति । यतः—ते त्वदीया द्विजाः काले अधुना चाश्रिता मघाम्" इति श्रीभागवते द्वादशस्कन्धे उक्तेः । "तेन वै ऋषयो युक्ता-स्तिष्ठन्त्यब्दशतं नृणाम्" इति, "यावद्देवर्षयस्सप्त मघासु विचरन्ति हि । तदा प्रवृत्तस्तु कलिः" इति च तत्रैवोक्तेः सप्तर्षिमण्डलस्यैकैकस्मिन्नक्षत्रे शतवर्षेषु स्थितिरिति तेन सिद्धान्तानुसारेण मघा-नक्षत्रे तेषां स्थितिसमये परीक्षितो जन्मेति तदैव कलिप्रवृत्तिश्चेति च ज्ञायते । "अधुना" इति परीक्षितं प्रति शुकेन भागवतार्थवर्णनसमये मघानक्षत्रे सप्तर्षिस्थित्याश्रयस्य कालस्य वर्तमानत्वेन निरूपणात् ॥ तथा—"आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ" इति बृहत्संहितायां शालिवाहनशकस्य (४२७) सप्तविंशत्युत्तरचतुश्शततमे वर्षे उत्पन्नेन वराहमिहिरेणोक्तेर्युधिष्ठिरपरि-क्षितोरुभयोरपि मघानक्षत्रे सप्तर्षिस्थितिसमये स्थितिप्रतीतेर्युधिष्ठिरपरिक्षितोरन्तरकालः प्रायः (८०) अशीतिवर्षाणि भवेयुः । एवं चाशीतिवर्षाणि (८०) युधिष्ठिरस्थितिकालादारभ्य परीक्षिज्जन्मावधिः कालः । तथा नन्दानां राज्यकालश्च शतं वर्षाणि (१००) । तथा परी-क्षितकालमारभ्य नन्दराज्यारम्भान्तः कालः (१०१५) अथ वा (१११५) वर्षाणि । एतेषां संकलने कृते (८०+१०१५ वा १११५+१००=(११९५ वा १२९५) युधि-ष्ठिरस्थितिकालादारभ्य नन्दराज्यान्तः कालः संपन्नः ।

कल्पादिमारभ्य युधिष्ठिरस्थित्यन्तरकालस्तु (४९५ वा ३९५) वर्षाणि । तदुक्तं स्कान्दे " ततोपि द्विसहस्रेषु दशाधिकशतत्रये । भविष्यं नन्दराज्यं च चाणक्यो यान्हनिष्यति "

इति । तत्र द्विसहस्रेष्वितिं निर्द्धारणे सप्तमी । दशाधिकशतत्रये इति सति सप्तमी । तथा च कलेर्द्विसहस्रवर्षमध्ये दशाधिकशतत्रये सति नन्दराज्यमित्यर्थः । (२०००—३१०=१६९०) । एवं च कलेर्दशाधिकशतत्रयन्यूनेषु द्विसहस्रवर्षेषु व्यतीतेषु नन्दा राज्यपरिपालनमारभन्तेति यावत् । नन्दराजराज्यकालश्च शतं समाः इत्युक्तम् (१६९०—१००=१७९०) इदानीन्तनैकोत्तरपञ्चसहस्रतमकलिवर्षसंख्यासु (५००१) उक्तसंख्यायाः (१७९०) वियोजने एकादशोत्तरद्विशताधिकत्रिसहस्रवर्षाणि (३२११) शिष्टानि भवन्ति ।

इतः प्राक् (३२११)—चन्द्रगुप्तो राज्यधुरमुदवहत् । ततश्च—तदा तदुत्तरं वा, महाभाष्यं पतञ्जलिना निर्मितमिति वक्तव्यम् । स एव पतञ्जलिकालः । ततः प्राक् पाणिनिकात्यायनयोः नन्दराज्यकाल एवेति चोक्तम् । **अन्ये तु** स्कान्दवचने " द्विसहस्रेषु " इत्यस्य स्थाने " त्रिसहस्रेषु " इति पाठान्तरम् । तत्पक्षेऽस्य कलेरेकोत्तरपञ्चसहस्रतम संख्याकवर्षेष्वादावेकादशोत्तरद्विशताधिकत्रिसहस्रवर्षेष्वतीतेषु तदुत्तरस्मिन्वर्षे (३२११) चन्द्रगुप्तराज्यारम्भ आसीदिति ज्ञेयम् । एवं च तदानीं तदुत्तरं वा महाभाष्यं पतञ्जलिना कृतमित्यादि प्राग्वदिति दिगित्याहुः ।

नवीना आङ्ग्लपण्डितास्तु—आङ्ग्लदेशादाङ्गलशकात्पूर्वं षोडशोत्तरत्रिशतीतमवर्षे (सन् ३१६) आङ्ग्लप्रभुवर्योऽलेग्जाण्डर्नामा भरतखण्डमाजगाम । तस्मिन्नेव वर्षेऽत्र भरतखण्डे पाटलीपुत्रराज्ये (पाटणापत्तने) चन्द्रगुप्तो राजा राज्यासनमारुरोह । ततः किञ्चित्कालोत्तरं तत एवाङ्ग्लदेशाद्भरतखण्डं प्रति सेल्यूकुलान्नो महामहिम्नः आङ्ग्लप्रभुवर्यस्यागमनसमयेऽत्र खण्डेऽतिप्रबलो राजायमेवासीत् । नान्यः कोपि तादृश इति **वदन्ति** । अनेन च तदनन्तरकालिकस्स इति वक्तव्यमिति बोध्यमिति दिक् ।

श्रीभट्टोजिदीक्षितस्य कालादिनिर्णयः ।

अयं भट्टोजिदीक्षितः कः किंनामीयः कदा कुत्र वासीदित्यादिकं किञ्चिद्विचारयामः—भट्टशब्दस्य शब्दकौस्तुभव्याख्याद्युक्तरीत्या चतुरशास्त्रज्ञे प्रवृत्तेः पूर्वकालेषु तथैव व्यवहाराच्चायं व्याकरणवेदान्तधर्मशास्त्रपूर्वमीमांसाशास्त्रज्ञः, कौमुद्यां स्वरवैदिकप्रक्रिययोः शाकलशाखास्थोदाहरणाच्छाकलर्क्शाखाध्यायी । लोकव्यवहारानुसारेण काशिकाकृतशिष्य इति च ज्ञायते । तथा शाङ्करमतानुयायी । अत एव मध्वमतखण्डनायाद्वैततत्त्वकौस्तुभाख्यो ग्रन्थोऽनेन रचितः । अत एव न रामानुजादिमतानुयाय्यपि । यतः—श्रीशाङ्करब्रह्मसूत्रभाष्यानुसारेणैवाधिकरणानां रचना सूत्रपाठादिक्रमश्च तत्र तत्त्वकौस्तुभे दृश्यते । एवं वृद्धयाह्निके पस्पशाह्निके च शुद्धाद्वैतमेव स्वाभिमतं प्रकाशयति स्म शब्दकौस्तुभे "श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्" इत्यादिना ।

भट्टोजीत्यादेः जीत्यादिशब्दघटितत्वादसंस्कृते रामजी कृष्णजीत्यादिवज्जीत्यन्तस्य बहुवचनान्तनामवाचकत्वेन नर्मदोत्तरदेश एव व्यवहारादयमपि तदेशीय इति सामान्यतो ज्ञायते । न तु तदेशीय इति निर्णेतुं शक्यते ।

अस्य पिता लक्ष्मीधरः । एतत्पुत्रो भानुजिदीक्षितः । येनामरसिंहकृतामरकोशस्य सुधानाम्नी व्याख्या वघेलवंशोद्भवश्रीमहीधरवंशाधिपकीर्तिसिंहदेवाज्ञया कृतेति वदन्ति । परन्तु स्वयं तेन नायं कृतो ग्रन्थः । किन्तु तन्नामाङ्कितत्वेन रामाश्रमनाम्ना विरचित इति ज्ञायते

इत्यन्ये । (युक्तं चैतत्) " बल्लवीवल्लभं नत्वा गुरुं भट्टोजिदीक्षितम् । अमरे विदुषे व्याख्यां मुनित्रयमतानुगाम् " इति ग्रन्थस्यादावेव तत्कृत्वा मध्येऽन्ते च मङ्गलस्य भट्टोजिदीक्षितवदकरणाद्रामाश्रमिनाम्नास्य टीकाग्रन्थस्य कृतत्वेन प्रसिद्धेः तन्नाम्नोक्तेश्च भानुजिदीक्षितकर्तृकत्वमस्येति न निश्चेतुं शक्यते । गुरुं भट्टोजिदीक्षितमित्युक्त्या तदीयविद्यार्थिषु भानुजिदीक्षितः स्यादेको न तु तत्पुत्रः । यत्तु भानुजिद्दीक्षित एव सन्न्यासोत्तरं रामाश्रमनाम्नाऽऽसीत् । ततस्तत्कृतोयं ग्रन्थ इति युक्तिं कथयन्ति ॥ तन्न ॥ गुरुं भट्टोजिदीक्षितमिति मङ्गलश्लोकोक्तरीत्या स्वयं संन्यस्य भट्टोजिदीक्षितस्य स्वपूर्वपितुर्नमस्कारकरणायोगात् । एतद्भानुजिदीक्षितपुत्रेण हरिदीक्षितेन मनोरमाव्याख्यानरूपं शब्दरत्नग्रन्थद्वय कृतम् । भट्टोजिदीक्षितपुत्रो वीरेश्वरदीक्षित इति रसगङ्गाधरप्रस्तावनायां लेखो दृश्यते इति पुत्रद्वयं वा सहानेनास्य, तस्यैव नामान्तरं वेति तु चिन्त्यम् । यदि वीरेश्वरस्यात्तर्ह्ययं भट्टोजिदीक्षितः काश्यामुवासेति निश्चीयते । वीरेश्वर इति नाम्नः तत्रैव प्रसिद्धेः । भट्टोजिदीक्षितेन विरचिता ग्रन्थाः—लिखितपुस्तकसंग्राहकलेखैरिस्थानादुपलब्धपुस्तकसूच्यनुसारेणान्यतश्चोपलब्धसूच्यनुसारेणापि प्रदर्श्यन्ते (१) आशौचप्रकरणम् । (२) कालनिर्णयः—(हेमाद्रिसारभूतः) । (३) चतुर्विंशतिमतव्याख्या । (१) आचारकाण्डः । (२) संस्कारकाण्डः । (३) प्रायश्चित्तकाण्डः । (४) श्राद्धकाण्डः । (४) तिथिनिर्णयः । (५) (शाब्दिक)—सिद्धान्तकौमुदी । (६) शब्दकौस्तुभः—लक्षग्रंथात्मकः एकः, तत्सारभूतश्चान्यः विनादौ नवाह्निकम् (७) । प्रवरनिर्णयः (८) तत्त्वकौस्तुभः । (९) मनोरमा सिद्धान्तकौमुदीव्याख्या । (१०) दायभागः । (११) तन्त्रसिद्धान्तदीपिका । (१२) त्रिस्थलीसेतुः (१३) तैत्तिरीयसन्ध्याभाष्यं चेति । तत्र शब्दकौस्तुभसाराख्यो ग्रंथः संपूर्णं न रचितः । अनुपलब्धेः । परन्त्वध्यायचतुष्टयं बहुषु स्थलेषु लभ्यते इति केचित् । ततः तदन्त एव ग्रन्थो रचित इति वक्तुमशक्यम् । अष्टमे वक्ष्यते इति शब्दकौस्तुभे एओडिति सूत्रे उक्तेरित्यन्ये ।

रसगङ्गाधरटीकाप्रणेत्रा शिवभट्टसतीदेव्योः सूनुना नागेशभट्टेन काश्यां कस्मिन्समये स्थितमिति विचारावसरे मनोरमाकुचमर्दनलघुमञ्जूषादिबहुग्रन्थविलोकनेनेत्थं पुरुषपरम्परा निश्चिनुमः—

शेषश्रीकृष्णः ।

भट्टोजिदीक्षितः (शिष्यः)	शेषवीरेश्वरः (पुत्रः)
वीरेश्वरदीक्षितः (पुत्रः)	पण्डितराजजगन्नाथः (शिष्यः)
हरिदीक्षितः (पुत्रः)	०
नागेश(नोजी)भट्टः (शिष्यः)	०

एवं च नागेशभट्टात्पूर्वः तृतीयः पुरुषः भट्टोजिदीक्षित इति पंडितराजाद्वितीयः पुरुषो नागेश (गोजी) भट्ट इत्यपि ज्ञायते । जगन्नाथपंडितराजसमयः (१६६६) तमः आङ्गलाब्दः । तेन पुरुषद्वयपर्यंतानां सामान्यतः चत्वारिंशद्वर्षाणां (४०) योजने (सन् १७०६) तम खिस्ताब्दोस्य नागेश (गोजी) भट्टस्य समयः । (२०) संख्यया तत्पूर्वकाले वियोजिते भट्टोजिदीक्षितस्य (सन् १६४६) तमाङ्गलाब्दो भवति समयः ।

अत्र च जयमहाराजाः श्रीसवाईजयसिंहवर्मणोश्वमेधप्रसंगे श्रीनागेशभट्टायामन्त्रणपत्रं प्राहिण्वन् । तदा नागेशभट्टेनाहं क्षेत्रसन्न्यासं गृहीत्वा काश्यामस्मि । अतस्तां परित्यज्यान्यत्र गन्तुं न शक्नोमीत्युत्तरं प्रहितम् । एषा किंवदन्ती जयपुरेऽधुनापि प्रसिद्धा । श्रीजयसिंहमहाराजा श्च (सन् १७१४) तमाङ्गलाब्देश्वमेधं कृतवन्त इति प्रसिद्धमेव ।--अयमश्वमेधयज्ञसंवत्सरोपि पूर्वोक्तरीत्या (१७०६) तमाङ्गलसंवत्सरारम्भसमय एवेति खिस्ताब्दीयाष्टादशशतकप्रथम-तुरीयांशे नागेशभट्ट आसीदिति व्यक्तमेव । केचित्तु खिस्ताब्दीयाष्टादशशतकपूर्वार्द्धानन्तरं नागेश (गोजी) भट्टस्थितिं कथयन्ति ॥

हरिदीक्षितशिष्योऽयं नागेशभट्टः स्वशिष्याच्छृङ्गवेरपुराधीशविसेनवंशसमुद्भूतरामनृपाल्लब्धजीवनो बहून् ग्रन्थात्प्रणिनाय । तत्रेदानीमुपलभ्या ग्रन्थास्त्वेते--

१ काव्यप्रकाशोद्योतः ।	१ बृहच्छब्देन्दुशेखरः ।	१ रसमञ्जरीटीका ।
१ परमलघुमञ्जूषा ।	१ अन्यो बृहच्छब्देन्दुशेखरः ।	१ लघुमञ्जूषा ।
१ परमार्थसारविवरणम् ।	१ प्रायश्चित्तेन्दुशेखरः ।	१ वृत्तिसंग्रहः ।
१ परिभाषेन्दुशेखरः ।	१ बृहन्मञ्जूषा ।	१ वेदान्तसूत्रवृत्तिः ।
१ लघुशब्देन्दुशेखरः ।	१ भाष्यप्रदीपोद्योतः ।	१ सप्तशतीटीका ।
१ रसतरंगिणीटीका ।	१ योगसूत्रवृत्तिः ।	१ साङ्ख्यसूत्रवृत्तिः
१ रसगङ्गाधरमर्मप्रकाशः ।	१ सापिण्ड्यनिर्णयः ।	१ लघुशब्दरत्नम्(स्वगुरु)
१ त्रिंशच्छ्लोकी(अशौचनिर्णयः)।	१ बृहच्छब्दरत्नम् ।	नाम्नानेन कृते शब्दरत्ने

इमे इति लोके प्रसिद्धिः प्रकृतमनुसरामः

रात्रौ यवन्या विहृत्य काश्यां गङ्गातटे शयानः पंडितजगन्नाथः भट्टोजीदीक्षितेन सारस्वत-ब्राह्मणेन श्लिष्टपदप्रायभाषणेन तदहङ्कारनिरसनद्वारा हितमुपदिष्टः तां यवनीं परिगृहीतां तत्याजेत्युदन्तोपि भट्टोजीदीक्षितसमयनिर्णायको जागर्ति--

अत्रेदं बोध्यम्--भट्टोजीदीक्षितः सारस्वतब्राह्मणः शालिवाहनशकस्य पञ्चदशे (१५) शतके आसीत् । एतद्वंश्या महाराष्ट्रे देवालये देवपूजनोपजीविनो दीक्षिताभिधा आसन् । स्वयं तदन्तर्गतोपि शास्त्राद्यभ्यासेन प्रतिष्ठा सम्पादनीयेति पर्यालोच्य काशीं गत्वा तत्र शास्त्राण्यधीते स्म । ततोचिरादयं भट्टाचार्यो बभूव । ततो पाणिनिव्याकरणशास्त्रे सिद्धान्तकौमुदीप्रभृतीनन्य-शास्त्रेष्वपि बहून्ग्रन्थान्व्यलिखित् । तेषां प्रचारार्थं तान्विलेख्य विलेख्य स बहुभ्यः पंडितेभ्यः

प्रेषयामास । स तेषु शा० शके (१६३७) तमे स्थितेन श्रीमदप्पय्यदीक्षितेनादौ तद्ग्रन्थ दर्शनजनितानन्दोल्लासवता सम्मानितः । तदानीमितरग्रन्थेभ्यस्सिद्धान्तज्ञानेत्रायासबाहुल्याभावे नास्मिञ्झटिति सर्वत्राध्ययनाध्यापनपथे स्वयमेव सिद्धान्तकौमुदी निर्निरोधेन विचचार । तथाति विस्तृतं वैयाकरणभूषणं, शब्दकौस्तुभं लक्षग्रंथात्मकं च, निबबन्ध । ततस्तदातनैरिदानीन्तनै रिव कैश्चित्परगुणासहिष्णुभिर्बृहच्छब्दकौस्तुभग्रंथः नाशमापादितः । तत्र नवाह्निकं प्रथमाध्याय प्रथमपादव्याख्यानं सर्वत्र पाठप्रवचनाधिक्येन स्वतोवशिष्ट च तद्दीक्षितजीवदशायामेव । ततस्तत्स्वयं पर्यालोच्यावशिष्टनवाह्निकस्याग्रे शब्दकौस्तुभग्रंथो लिखितस्संक्षेपेण । तस्य पूर्तिरासीन्न वा न ज्ञायते । यतः प्राचीननवाह्निकेन सह चतुर्थाध्यायान्त एवेदानीमुपलभ्यते शब्दकौस्तुभग्रन्थ इत्युक्तम् । वेदान्ते धर्मशास्त्रादौ च बहून्ग्रंथांल्लिखित्वैवायुषापट्पञ्चाशत्तमे वयसि शरीरं तत्याजेति ॥

अत्र केचित्—अस्ति लोके इतिहासान्तरमेतद्विषये (तथा हि)—अन्त्ये वयसि व्याकरणाध्येतुः कस्यचित्स्वमनोनुकूलस्य शिष्यस्यालाभेन दुःखमपारयन्नेव मृत्वा ब्रह्मराक्षसोभूत् । ततश्चिरात्तादृशः कश्चिद्ब्राह्मण आगत्य प्रौढपण्डितेषु स्वस्याध्ययनयोग्यतालाभाय किञ्चित्कमप्यल्पं ग्रन्थमध्येतुमध्यापकमन्विष्यन्तिस्ततो विचार्य परिहासेन केनचित्खलेनोक्तं सत्यं मत्वा ब्रह्मराक्षसगृहं कैरप्यप्रविष्टपूर्वमतिभयङ्करमपि प्रविश्य सन्ध्यामनतिष्ठन्तं तं नत्वा व्याकरणमध्येतुं श्रीमदीयचरणाम्बुजे आससादेति विज्ञापयामास । ततस्तेन राक्षसरूपेण भट्टोजीदीक्षितेन यावदध्ययनं कस्यापि समीपे शास्त्राध्ययनाध्यापनविषयकं किञ्चिदपि सल्लापादिकं न कार्यम् । तुभ्यमन्नवस्त्रादिकं सर्वमहं दास्ये इत्युक्तम् ! ततस्स सर्वमभ्युपगम्य तथेति तिष्ठन्व्याकरणशास्त्रं प्रत्यहमधीयाय । अष्टवर्षाभ्यन्तरे स तत्र पण्डितो बभूव ततो भट्टोजिदीक्षितः स्वशिष्य साहूय कस्मिंश्चिद्दिने स्वीयं यावद्वृत्तं कथयित्वा तस्मै बहु धनहिरण्यादिकं दत्वा तद्ब्राह्मणाज्ञया ततो मुक्तो बभूवेतीतिहासान्तरं **वर्णयन्तीति शिवम्** ॥

शेषवेङ्कटसुब्रह्मण्याख्ये विद्वच्छिखामणेः ।
जातेन पार्वतीदेव्या अर्पितश्शिवयोरयम् ॥ १ ॥

इत्युत्तरभागस्समाप्तः ।

इति श्रीकाशीशेषवेङ्कटाचलशास्त्रिकृतस्त्रिमुनिकल्पतरुस्समाप्तः ।

